Acc No.
743

पूर्वार्द्धं एकक कम सौ पत्रा द श म पू

0/6

श्री- भा- द- १

ॐ श्रीगणेशाय नमः ॥ ॐ विश्वसर्गविसर्गादिनवलक्षणलक्षितं श्रीकृष्णाख्यं परं धाम जगद्धाम न
त मामि तत् १ दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहं क्रीडद्यदुकुलांभोधौ परानंदमुदीर्यते २ द
शमे कृष्णसत्कीर्तिवितानायानुवर्ण्यते धर्मग्लानिनिमित्तस्तन्निरोधो दुष्टभूभुजां ३ प्राकृतादिसृ
ष्टानां येन निरोधः सत्ववर्त्मिनः नवानां संगतः सृष्टिसंहारादिनिरूपणैः कृताः नवतिरध्यायाः द
शमे कृष्णकीर्तये स्याद्येष्वत्र भिरध्या यैः व्रजप्रार्थनया वनेः भारं हर्तुं हरेर्जे
न्मप्रसंगो निरूप्यते ५ गोकुले मथु रायां च द्वारवत्यां ततः क्रमात् कृष्ण

ॐ श्रीकृष्णाय नमः ॥ राजोवाच ॥ क थितो वंशविस्तारो भवता सोमसू
र्ययोः राज्ञां चोभयवंश्यानां चरि तं परमाद्भुतं १ यदोश्च धर्मशील
स्य नितरां मुनिसत्तम ॥ तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि
शंस नः २॥

लीलात्रिधा प्रोक्तानतद्वैदैस्तत्र्वेक ४ या ६ सपंचत्रिंशताध्यायैर्वृहद्वदाव
नादिषु गोकुले वसतो लीला वर्ण्यते स्फुटं ७ एकेन यमुनावासिरणे क्रूरेण कृता स्तुतिः ॥
एकादशभिराख्याता लीला मथुरे कृता ८ पुरे द्वारवती लीला नतत्रिमीणादि वर्ण्यते कृ
तानवतिरध्यायादशमे विशदाः कथाः ९ तत्र तु प्रथमे कंसः स्वमृत्युं देवकीसुतात् श्रुत्वा
भीतो वधीत्पुत्रान्यद्गर्भानिति वर्ण्यते १० कृष्णावतारचरितं श्रवणात्पूतनिष्ठितः शुकाद्वादे
नोत्सवाद्राजा पृच्छति तत्पुनः ११ कथितो वंशविस्तार इति १ श्रीशौनकेति प्रश्नोत्पत्तिमभिप्रायेत्तोक्तं २ १

भा॰ द॰
ए॰
२

नकेवलंपांडवानेवारक्षत् अहंममशरीरमपियोरक्षत्तिनवानत्याह द्रौण्यस्त्रविप्लुष्टमिति द्रौ-
ण्यस्त्रमुक्तात्स्वात्स्त्रेणदग्धमिदंमच्छरीरं कुरूणांपांडवानांचसंतानस्थानिदानंमममातुःकु-
क्षौप्रविश्यतंचक्रोयोऽन्वगोपयेति ६ अखिलदेहभाजामंतर्बहिश्चपुरुषकालरू-
पेणकालरूपैश्च अंशांशिभावेनबहुवदवनेमृत्युंसंसारंउतअपिअमृतमपिप्रयच्छतोवीर्या-
वदस्वविद्वन् अयंभावः अंतर्यामिरूपेणांतर्देहिनांमुक्तिंबहिर्देहिनांचकालरूपेणमृत्युं

द्रौण्यस्त्रविप्लुष्टमिदंमदंगंसंतानबीजंकुरुपांडवानां जुगोपकुक्षिंगतआत्तचक्रोमा-
तुश्चमेयःशरणंगतायाः ६ वीर्याणितस्याखिलदेहभाजामंतर्बहिःपूरुषकालरू-
पैःप्रयच्छतोमृत्युमुतामृतंच मायामनुष्यस्यवदस्वविद्वन् ७ रोहिण्यास्तनयःप्रोक्तो
रामःसंकर्षणस्त्वया देवक्यागर्भसंबंधःकुतोदेहांतरंविना ८ ॥

ददातीत्यर्थः अतोऽस्यांतर्हितस्यावीर्याण्येववर्णनीयानीति ७ ननुबलेगर्भसंसारणंवहुमर्मदंविप्र-
लंभवे वसुदेवस्तुरोहिण्यांबलादीनुत्पादयदिति रोहिण्यास्तनयोरामःप्रोक्तः वसुदेव-
स्तुदेवक्यामष्टपुत्रानजीजनत् कीर्तिमंतंसुषेणंचभद्रसेनमुदारधीः ऋजुंसंमर्दनंभद्रंसंक-
र्षणमहीश्वरं अष्टमस्तुतयोरासीत्स्वयमेवहरिःकिलेति पुनर्देवक्यागर्भसंबंधस्तस्योक्तः

ननु तानि ज्ञातो गतः पितामहाद्युत्तमेषु पितार्थे इत्यादिना संक्षेपं पुनर्विस्तरेण वदेत्याह अव
तीर्येति ३ अत्र लोके त्रिविधा जनाः मुक्ता मुमुक्षवो विषयिणश्च तेषां मध्ये अत्र न कस्याप्य
लेप्रत्यय इत्याह निवृत्ततर्षैरिति गलत्स्वेव मुक्तेरपीत्यर्थः मुमुक्षूणामयमेवोपाय इत्या
ह भवौषधादिति विषयिणां परमो विषयोऽयमेवेत्याह श्रोत्रमनोभिरामादिति अपगता

अवतीर्य यदोर्वंशे भगवान्भूतभावनः कृतवान्यानि विश्वात्मा तानि नो वद विस्तरा-
त् ३ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् क उत्तमश्लोकगुणा-
नुवादात्पुमान्विरज्येत विना पशुघ्नात् ४ पितामहा मे समरेऽमरंजयैर्देवव्रताद्याति-
रथैस्तिमिङ्गिलैः दुरत्ययं कौरवसैन्यसागरं कृत्वातरन्वत्सपदं स्म यत्प्लवाः ५

पशुर्यस्मात्तमात्मानं हन्तीत्यपशुघ्नः तस्मात्पशुघ्नाद्विनेति वा ४ किंच अस्मत्कुलदैवते ७
श्रीकृष्णे अनन्तकथैव नित्यं श्रोतव्येत्याशयेनाह पितामहा मे इति अमरान् जयन्ति ये तैः भा.
देवव्रतो भीष्मः तदाद्यैरतिरथैस्तिमिङ्गिलैस्तत्तुल्यैर्दुरत्ययं वत्सपदमिव अल्पत्वं कृत्वा तु टि.
श्रीकृष्णात्तरन्स यः श्रीकृष्णस्य प्लवत्वं ये तेषां तेन स्वीयं पाण्डवदस्येति तन्नीयश्लोकगाने

भा॰ द॰
पू॰
१

तत्र तावत्प्रथमं भगवदवतारकारणमाह भूमिरित्यादिनवभिः श्लोकैः दृप्तनृपव्याजा ये दैत्या।
स्तेषामनीकशतानामयुतैर्यो भूरिभारस्तेनाक्रान्ता १७ विभोरन्तिके स्थिता सती १८ १९ २०

भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः आक्रान्ता भूरिभारेण ब्रह्माणं शरणं ययौ १७
गौर्भूत्वाश्रुमुखी खिन्ना क्रन्दन्ती करुणं विभोः उपस्थितान्तिके तस्मै व्यसनं स्वमवोचत
१८ ब्रह्मा तदुपधार्याथ सह देवैस्तया सह जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः १९
तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिं पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः २० गि
रं समाधौ गगने समीरितां निशम्य वेधास्त्रिदशानुवाच गां पौरुषीं मे शृणुतामराः पुन
र्विधीयतामाशु तथैव मा चिरं २१ पुरैव पुंसावधृतो धराज्वरो भवद्भिरंशैर्यदुषूपजन्यतां
स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि २२ वसुदेवगृहे साक्षाद्भ
गवान्पुरुषः परः जनिष्यते तत्प्रियार्थं संभवन्तु सुरस्त्रियः २३ वासुदेवकलानन्तः
सहस्रवदनः स्वराट् अग्रतो भविता देवो हरेः प्रियचिकीर्षया २४ विष्णोर्माया भग
वती यया संमोहितं जगत् आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति २५ ॥श्रीगुरुक॰

पौरुषीं पुरुषस्य भगवतो गां वाचं मे मत्तः आशु शृणुत मा चिरं अविलम्बितं तथैव विधीयतां चेति
२१ विज्ञापनात्पुरैव पुंसा ईश्वरेण ज्वरस्तापः २२ २३ २४ देवकीगर्भसंकर्षणाद्यशोदायां मो

कस्मादिति भावतः कंसभयशंकासंभवादित्यर्थः ९ मातुर्भ्रातरं कंसं च कस्माद्धतवान्तर्हि ग्रहीतास्मान्नकस्मादवधीत् १० ११ ननु हन्त क्षुधापीडितस्यापि तव कुतः श्रवणावकाश इत्यत्रा

कस्मान्मुकुंदो भगवान् पितुर्गेहाद्व्रजं गतः क्व वासं ज्ञातिभिः सार्द्धं कृतवान्सात्वतां पतिः
९ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः भ्रातरं चावधीत्कंसं मातुरद्धातदर्हणं १०
देहं मानुषमाश्रित्य कति वर्षाणि वृष्णिभिः यदुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्र
भोः ११ एतदन्यच्च सर्वं मे मुने कृष्णविचेष्टितं वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं
१२ नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते पिबंतं त्वन्मुखाम्भोजच्युतं हरिकथामृतं
॥सूत उवाच॥ एवं निशम्य भृगुनंदन साधुवादं वैयासकिः स भगवानथ विष्णुरातं प्रत्य
र्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः १४ ॥श्रीशुक उ॥ सम्यग्व्य
वसिता बुद्धिस्तव राजर्षिसत्तम वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः १५ वासुदे
वकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा १६

हन्तैवेति त्यक्तोदकस्यापि सम जीवनं हरिकथामृतपाननिमित्तं तदुपरमे स्यादेव जीवितं न
स्यादित्यर्थः १३ एवं साधुवादं समीचीनं प्रश्नं भागवतप्रधानः भागवतेषु श्रेष्ठः १४ व्यवसिता

सामभेदाभ्यां संबोधन् तत्र साम पंचविधं भेदो द्विविधः तत्र संबंधलाभोपकृतिर्गुणभेदो गु॰
णकीर्तनं साम पंचविधभेदोद्देशादृष्टभयं वच इति तत्र श्लाघनीयेति गुणकीर्तनं भगिनीमि॰
ति संबंधकथनं पुत्रिकेवमेत्यमेदं वदति हन्यादिति स्त्रीवधनिषेधात्यायशीलाभं दर्शयति उद्वा
न४ हपर्वणीति संमानदृष्टोपकारं दर्शयति ३५ ३६ मरणभयेन हन्मीति चेत्तथापि मरणस्यापरिहा
र्यत्वाद्देहांतरस्यावश्यंभावित्वात्तत्रापि च भोगप्रेमाभ्यस्तत्वादीनां अविशेषान्नाद्ययेन पापाच

तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं वसुदेवो महाभाग उवाच परिसांत्वयन् ३५ ॥ वसुदे
व उ॰ ॥ श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः स कथं भगिनीं हन्यात्स्त्रियमुद्वाहप॰
र्वणि ३६ मृत्युर्जन्मवतां वीर देहेन सह जायते अद्य वाब्दशतांते वा मृत्युर्वै प्राणिनां
ध्रुवः ३७ देहे पंचत्वमापन्ने देही कर्मानुगोऽवशः देहांतरमनुप्राप्य प्राक्तनं त्यजते व॰

रणमयुक्तमित्यभिप्रेत्याह मृत्युर्जन्मवतामित्यादि देहेन सहेति विधात्रा ललाटे लिखित॰
त्वादित्तथापि कालविलंबार्थं हन्मीति चेत्तत्राह अद्य वेति अवश्यंभाविनि मरणे विलं
बमात्राय पापाचरणमयुक्तमिति भावः ३७ किंच अस्मिन्देहे गते यदि देहांतरं न स्यात् त
दा युज्येत पापे नापि तत्पालनं न तु तदस्तीत्याह देहे पंचत्वमापन्न इति आपन्नप्राये कर्मव
शात् अप्रयत्नेन एव प्रथमं देहांतरं प्राप्यैव प्राक्तनं देहं त्यजति ३८ ॥

भोजेंद्रवंशनागारेवतारायप्रस्तावकथामाह शूरसेनइत्यादियावदध्यायसमाप्तिः मथुरायां।
आवसन् विषयान्देशान् २६ २७ सूर्यया नवोढया प्रयाणे प्रयाणार्थं २८ रश्मीन् प्रग्रहान् २९
पारिबर्हं उपस्करं ३० ३१ ३२ आभाष्य हे कंसेति संबोध्य हंताह निष्यति ३३ कुलपांसनः कुलदू

शूरसेनो यदुपतिर्मथुरामावसन्पुरीं माथुरांश्छूरसेनांश्च विषयान्बुभुजे पुरा २६ राज।
धानी ततः साभूत्सर्वयादवभूभुजां मथुरा भगवान्यत्र नित्यं संनिहितो हरिः २७ त।
स्यां तु कर्हिचिच्छौरिर्वसुदेवः कृतोद्वहः देवक्या सूर्यया सार्द्धं प्रयाणे रथमारुहत् २८
उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया रश्मीन्हयानां जग्राह रौक्मै रथशतैर्वृतः २९
चतुःशतं पारिबर्हं गजानां हेममालिनां अश्वानामयुतं सार्द्धं रथानां च त्रिषट्शतं ३०
दासीनां सुकुमारीणां द्वे शते समलंकृते दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ३१ शं
खतूर्यमृदंगाश्च नेदुर्दुंदुभयः समं प्रयाणप्रक्रमे तावद्वरवध्वोः सुमंगलं ३२ पथि
प्रग्रहिणं कंसमाभाष्याहाशरीरवाक् अस्यास्त्वामष्टमो गर्भो हंता यां वहसेऽबुध ३३ इत्युक्तः
स खलः पापो भोजानां कुलपांसनः भगिनीं हंतुमारब्धः खड्गपाणिः कचेऽग्रहीत् ३४

षणः आरब्धः उद्युक्तः कचे केशबंधे ३४ नृशंसं क्रूरं महाभाग इत्यस्यायं भावः स्वजन्मनि हर्षेणादे।
वैरानकदुंदुभिघोषणाद्वा विभगवदवतारे गणप्रतीकारस्य संभवतीति सांत्वयन्स्त।

ननु विचित्रदेहहेतूनां कर्म्मणां कर्तृत्वाद्देहविशेषप्राप्तौ किं कारणमतआह यतोयतइति दे
हस्थं पंचसु समयं पंचसु गुणेषु भूतेषु मायारचितेषु मायया नानादेहरूपेण रचितेषु दैवेन फ।
लाभिमुखेन कर्म्मणा चोदितं नानाविकारात्मकं मनोयंयं देहं दैवतिर्य्यगादिरूपं प्रतिधावति।
धावत्युत्सत्तयं यमाप अभिनिवेशेन प्राप्नं तत्रतत्रासौ देही जायते ननु मनसः कर्तृत्वान्न देव
जायतां नतु कर्तुरात्मेत्यतआह प्रपद्यमानइति नदेवाहमिति प्रपद्यमानः सहतेन जायतइति
५१ ननु सत्यं भविष्यत्येवं किमपि देहमात्रेन व्याप्यस्यादिति प्रियस्य राजदेहस्य रत्नाणायावृत्तम

यतोयतो धावति दैवचोदितं मनोविकारात्मकमाप पंचसु गुणेषु मायारचितेषु देह्य
सौ प्रपद्यमानः सहतेन जायते ५१ ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगा।
तं विभाव्यते एवं स्वमायारचितेष्वसौ पुमान् गुणेषु रागानुगतो विमुह्यति ५२

पिक्रियतइति चेत्तत्राह ज्योतिरिति अदः सूर्य्यचन्द्रादिज्योतिः उदकयुक्तेषु पार्थिवेषु घटादिषु यद्वा
उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिंबेन स्थितं समीरस्य वायोर्वेगं अनुगतं कंपादियुक्तं
प्रतीयते यथा एवं स्वाविद्यया रचितेषु गुणेषु देहेष्वसौ रागेणानुगतः प्रविष्टो मुह्यति अभि
निवेशं प्राप्नोति अयंभावः आत्मनस्तावद्देहाद्यध्यासाज्जन्मोक्तं सहतेन जायतइति ततश्चान्यो
न्यधर्म्माध्यासाद्यथा देहधर्म्माः कार्श्यादयः आत्मनि प्रतीयंते एवमात्मधर्म्माः प्रेमास्पदता

५ दयोपि देहेष्विति रजःस्थक देहयोः विशेषाभाव यथा प्रसक्ता प्रतीकारः इति ५२

अत्र दृष्टान्तः व्रजन्निति एकेन अग्रतो निहितेन पदा तिष्ठन् भवन् अवष्टभ्य देहं विभ्रत् पश्चाद
न्येन पूर्वप्रदेशादुत्थाप्य पुरो निहितेन गच्छतीति तद्वत् अत्र च स्वीकारपरित्यागेनात्यन्तं भिन्नविष
याविति स्वप्नेऽपि दृष्टान्तान्तरमाह यथा तृणजलौकेति साहिं तृणान्तरमवष्टभ्य पूर्वं तृणं त्यजति ए
वं कर्मप्रवृत्तमानो न्यो जीवोऽपि ॥१९॥ देहविषयावेव स्वीकारपरित्यागेन दर्शयितुं दृष्टान्तान्तर
माह स्वप्न इति दृष्टं राजादिदर्शनं श्रुतं इन्द्रादिश्रवणं ताभ्यामाहितसंस्कारेण मनसा नवेन

व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छति । यथा तृणजलौकैवं देही कर्मगतिं गतः ॥१९॥ स्व
प्ने यथा पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः । दृष्टश्रुताभ्यां मनसानुचिंत
यन् प्रपद्यते तत्किमपीह्यपस्मृतिः ॥५॥

चिंतयन् ईदृशं जाग्रद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमपि अनिरुक्तं पश्यति तथा न रेचत
दैवाहमिति प्रपद्यते मन्यते ततश्च जाग्रद्देहादपगतस्मृतिर्भवति पुरुषो यथेति जाग्रत्या
वदर्शयितुं दृष्टान्तान्तरमाह मनोरथेति अत्रापि दृष्टश्रुताभ्यामित्यादि सर्वं योज्यं तथा च वस्त
ति जन्तोर्वैकस्य चिद्धेतोर्महत्वस्यान्तं विस्मृतिः जन्मनात्मतयापुंसः सर्वभावेन भूरिदेति
विषयस्वीकृतिं प्राहुर्यथा स्वप्नमनोरथः स्वप्ने मनोरथे चेत्यं प्राक्तनेन स्मरत्यसावित्यादित

एवमुक्तं सामोपायमुपसंहरन्भेदमाह तस्मादिति परजइति अभिद्रुह्यमानानस्मेवेधिनश्चाप
मादपि इहामुत्र च भयमिति भेदो दर्शितः ४२ पुनः साममाह एषेति पुत्रिकोपमा दारुमयी वा
अचेतनप्राया ४४ बोध्यमानः उपदिश्यमानः स्वयं दारुणः पुनः पुरुषादानन्तेत्यानअनुसृतइ
ति ४५ आनकदुन्दुभिरिति पदं महाभागइत्यनेनोक्ताभिप्रायं प्रतिवोढुं प्रतिकर्तुमित्यर्थः इदं व

तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै परतो भयं ४३ ए
षा तवानुजा बाला कृपणा पुत्रिकोपमा हन्तुं नार्हसि कल्याणीमिमां त्वं दीनवत्सल ४४
श्रीशुक उवाच ॥ एवं स सामभिर्भेदैर्बोध्यमानोऽपि दारुणः न न्यवर्तत कौरव्य पुरुषादान
नुव्रतः ४५ निर्बन्धं तस्य तं ज्ञात्वा विचिन्त्यानकदुन्दुभिः प्राप्तं कालं प्रतिव्योढुमिदं तत्रा
न्वपद्यत ४६ मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयं यद्यसौ न निवर्तेत नापराधोऽस्ति दे
हिनः ४७ प्रदाय मृत्यवे पुत्रान्मोचये कृपणामिमां सुता मे यदि जायेरन्मृत्युर्वा न म्रि

त्यमाणामपत्यार्पणं अन्वपद्यत ज्ञातवान् ४६ ननु खलोऽयमेतन्न मन्येतेत्याशङ्क्याह स्वय
मेव मृत्युरिति ४८ तस्मादुपेक्षातो दोषपरिहारार्थमेवं करिष्यामीत्याह प्रदायेति मृत्यवे कंसाय
ननु इदमपि नैवं न्याय्यमित्याशङ्क्याह सुताइति अस्यां यदि मे सुता जायेरन् तत्तदा यज्ञाविनङ्क्ष्या
वत्सु जीवितं तावद्वेदैवान्तरं तदा यद्ययमेव म्रियेत तदा न किंचिदन्याय्यं ४८

म २

भा॰ द॰
स्कं॰
६

यदिचसत्त्वामभविष्यंतिनचायंमम्रियेततदामत्पुत्रादेवास्यमरणमितिविपर्ययोवाकिंनस्यात् नन्वप्रौ
ढस्यकेस्यनवबालकात्कथंमत्पुत्रःस्यात्तत्राह गतिर्ज्ञातुरिति अस्यास्त्वात्मस्थमोगमोहेनेस्यकव
नेः अतद्दानीमपत्याप्येणप्रतिज्ञैवमेत्रः नथासति उपस्थितोमत्पुत्ररूपेणातवन्निवर्तेत निवृत्तःपुनः
कालांतरेप्राप्नुतेत्वेत्रापरायोममेत्यर्थः अपुत्रवामत्पुत्रात्रुपस्थितोमत्पुत्ररूपः वृथायोनिवर्ततत्पुन
रनेनसन्नंत्रेणभवेदेवेति यद्वागतिर्ज्ञातुर्दुरन्ययेत्येतत्स्यैवप्रपंचउपास्थितउति ४९ प्राणिनाम

विपर्ययोवाकिंनस्याद्गतिर्धातुर्दुरत्यया उपस्थितोनिवर्तेतनिवृत्तःपुनरापतेत् ४९
अग्नेर्यथादारुवियोगयोगयोरदृष्टतोन्यन्ननिमित्तमस्ति एवंहिजंतोरपिदुर्विभाव्यःशा
रीरसंयोगवियोगहेतुः ५० एवंविमृश्यतंपापंयावदात्मनिदर्शनं पूजयामासवैशौरि
र्बहुमानपुरःसरं ५१ प्रसन्नवदनांभोजोनृशंसंनिरपत्रपं मनसादूयमानेनविहसन्निद
मब्रवीत् ५२ ॥वसुदेवउ॥ नह्यस्यास्तेभयंसौम्ययद्वैसाहाशरीरवाक् पुत्रान्समर्पयिष्येस्यै यतस्तेभयमुत्थितं ५३

हृष्टेवपुनर्दर्विनर्कमितिसहृष्टांतमाह अग्नेरिति वनेहृतानप्रदहनवह्निःसन्निहितानपिद
ग्धान्दहतिदग्धान्कदाचिद्दूरस्थानपिदहतिग्रामेगृहाद्वा नह्यस्यप्रोग्यदृष्टव्यतिरेकेणकिंचिन्नि
मकर यामकमस्तियथाएवंजंतोर्जन्ममरणयोरपिहेतुर्दुर्विभाव्यःअचिंत्यः ५० यावदात्मनिदर्शनंस्वप्रतावि
धिविचार्य ५१ तस्यविश्वासायविकसितमुखांभोजःप्रहसन्नब्रवीत् ५२ यतस्यथाअशरीरिणीवा
णाहततथाहिनिश्चिते अस्याःसकाशात्तेभयंनास्ति यतःयेभ्यःपुत्रेभ्यस्तेभयमुत्थितं अष्ट

स्वसुर्वधान्निववृतेकंसस्तद्वाक्यसारवित् वसुदेवोपितंप्रीतःप्रशस्यप्राविशद्गृहं ५४

॰अथ कंसमुपागम्य नारदो ब्रह्मदर्शनः एकांतमुपसंगम्य वाक्यं चैतदुवाच ह ॰ मूलं

निवृत्ते निवृत्तः तद्वाक्ये सारस्तु ययतिस्त द्विन ५५ प्रसूतिकाले संप्राप्ते सर्वः सर्वात्मा भगवाने
व देवता यस्याः सा तथा सर्वदेवतामयी भगवदाश्रयत्वात् ५६ सत्यव्रते पुत्रे कथमर्पितवानत्य
पेक्षायामाह किं दुःसहमिति साधूनां सत्यसंधानां पुत्रलालनस्यापेक्षा कथं स्यात्तेत्यत आ
ह विदुषामिति भगवानेव तत्त्वेनान्यदिति जानतामित्यर्थः ननु स्वयं नीते सति कंसो बालेन

श्रीशुक उ॰॥ स सर्वथा निवृत्ते कंसस्तद्वाक्यसारवित् वसुदेवोऽपि तेन प्रीतः प्रशस्य प्राविशद्गृ
हं ५५ अथ काल उपावृत्ते देवकी सर्वदेवता पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरं ५६
कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिः अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ५७
किं दुःसहं नु साधूनां विदुषां किमपेक्षितं किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां
५८ दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिं कंसस्तुष्टमना राजन्प्रहसन्निदमब्री
त ५९ प्रतियातु कुमारोऽयं न ह्यस्मादस्ति मे भयं अष्टमाद्युवयोर्गर्भान्मृत्युर्मे विहितः कि
ल ६० तथेति सुतमादाय ययावानकदुंदुभिः नाभ्यनंदत तद्वाक्यमसतो विजितात्मनः
६१ नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रि

हत्वादिति मन्वानो नवानिति किं तस्मादिति नेत्याह किमकार्यमिति ननु देवकी कथं पुत्रं तत्य
ज्येत्यत आह दुस्त्यज इति चिते धृत आत्मा हरिर्यैस्तेषां ६० ६१ कंसस्य शांतिर्दैवकार्य्यानुगा
भवतीति नारदस्य प्रत्ययस्थानं तदाह नंदाद्या इति त्रयेण ६२ ॥

भा॰ द॰
पू॰
८

उभयोर्वसुदेवनंदकुलयोः ६३ वधोद्यमं देवकृतमिति शेषः ---- निगडैः शृंखलैः अजननोवि
स्रस्तशंकया ६६ ॥इतिश्रीश्रीधरस्वामिकृतायां टीकायां प्रथमोऽध्यायः १ द्वितीये कंसयातनाय देव

सर्वे वै देवताप्राया उभयोरपि भारत ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ६३ एतत्कंसा
य भगवान्शशंसाभ्येत्य नारदः भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं ६४ ऋषेर्वि
निर्गमे कंसो यदून्मत्वा सुरानिति देवक्या गर्भसंभूतं विष्णुं च स्ववधं प्रति ६५ देव
कीं वसुदेवं च निगृह्य निगडैर्गृहे जातं जातमहन्पुत्रं तयोरजनशंकया ६६ मात
रं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ६७
आत्मानमिह संजातं जानन्प्राग्विष्णुना हतं महासुरं कालनेमिं यदुभिः स व्यरुध्य
त ६८ उग्रसेनं च पितरं यदुभोजांधकाधिपं स्वयं निगृह्य बुभुजे शूरसेनान्महाब
लः ६९ ॥इतिश्रीभागवते महापुराणे दशमस्कंधे श्रीकृष्णावतारोपक्रमे प्रथमोऽध्यायः १
श्रीशुक उवाच॥ प्रलंबबककाणूरतृणावर्तमहाशनैः मुष्टिकारिष्टद्विविदपूतना
केशिधेनुकैः १ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः यदूनां कदनं चक्रे बली
मागधसंश्रयः २ ते पीडिता निविविशुः कुरुपंचालकेकयान् शाल्वान्विदर्भान्निष

वक्या गर्भगो हरिः ब्रह्मादिभिः स्तुतः सावसंतितेति निरूप्यते १ यदुभिः स विरुध्यतेत्यु
क्तं तमेव विरोधं प्रपंचयति त्वः यादेवकीगर्भस्थान्यत्र संचारेण भगवतः प्रवेशं वक्तुं प्रलं

अनुरुंध्यानाः अनुवर्त्तमाना ४ धामकलानन्देवस्य सप्तमो गर्भो बभूव किं तद्धामेत्यत आह यमनं।
तमिति हर्षशोकविवर्द्धनः आनंदरूपस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधारणाद्दृष्टाच शोकः

एकेनमनुरुंध्याना ज्ञातयः पर्य्युपासते हतेषु षट्सु बालेषु देवक्या औग्र
सेनिना ४ सप्तमो वैष्णवं धाम यमनंतं प्रचक्षते गर्भो बभूव देवक्या हर्ष
शोकविवर्द्धनः ५ भगवानपि विश्वात्मा विदित्वा कंसजं भयं यदूनां।
निजनाथानां योगमायां समादिशत् ६ गच्छ देवि व्रजं भद्रे गोपगोभिर।
लंकृतं रोहिणी वसुदेवस्य भार्य्यास्ते नंदगोकुले ७ अन्याश्च कंससं
विग्ना विवरेषु वसंति हि देवक्या जठरे गर्भं शेषाख्यं धाम मामकं ८

ति ५६७ ननु सा गोकुले किमित्यास्ते अत आह अन्याश्चेति केवलं सैव अन्या अपीति विवरेषु
अलक्ष्यस्थानेषु जठरे संतं ननु गर्भ आकृष्यमाणः कथं जीवेदित्यत आह सामकं धामेति ८

भा-द
पू
८

ततः किमर्थमेवं कार्यमित्यत आह अथेति अनंतरमेवेत्यर्थः अंशभागेनेति अंशैः ज्ञानेच्छादिभिर्भ
जते आश्रयतीति सर्वानुरक्तादिसेवयर्थे तानर्थ अंशभागस्तेन परिपूर्णेन रूपेणेत्यर्थः यद्वा अंशो
ज्ञानैश्वर्यबलादिभिर्भजयति यो जयति सीयानिति स्वकीयान्भक्तान्तथाऽनेनेति यद्वा अंशो
न पुरुषरूपेण मायया भागो भजनं यस्य तेन यद्वा अंशेन मायया गुणावतारादिरूपाभागो भे
दो यस्य तेन यद्वा अंशा एव मत्स्यकूर्मादिरूपा भजनीया न तु साक्षात्स्वरूपं यस्य तेन अथवा अंशो

तस्येति कृष्णरोहिण्या उदरे संनिवेशाय अथाहमंशभागेन देवक्याः पुत्रतां शुभे प्राप्स्यामि त्वं
यशोदायां नंदपत्न्यां भविष्यसि ९ अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं धूपोपहारबा
लिभिः सर्वकामवरप्रदां १० नामधेयानि कुर्वंति स्थानानि च नरा भुवि दुर्गेति भद्रकाली
ति विजया वैष्णवीति च ११ कुमुदा चंडिका कृष्णा माधवी कन्यकेति च माया नारायणी
शानी शारदेत्यंबिकेति च १२ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि रामेति लोकरम
णाद्बलं बलवदुच्छ्रयात् १३

शेन बलादिभिर्भजनं अनुवर्तनं भक्तेषु यस्य तेन सर्वथा परिपूर्णेन रूपेणेति विवक्षितं कृष्ण
स्तु भगवान्स्वयमित्युक्तत्वात् इति तां प्रोत्साहयति त्वं यशोदायामिति सार्द्धैश्चतुर्भिः ९ सर्वा
न्मनुष्यादीन्कामयंते येते तेषां वरो ईश्वरी ईश्वरो नियंत्री अर्चकानां सर्वान्कामवरान्प्रददाति या तां
१० ११ १२ तद्धि क्रमेणानस्य व्यपदेशा भविष्यंतीत्याह गर्भसंकर्षणादित्यादिना रामेति सं
तोषयनेकरिष्यति तया संकृष्टेन तेन लोकस्य रमणात् रत्नत्वात् १३ ८

तथेति पुनरपि ओमित्यादरेण प्रतिगृह्य समष्टार्थौ १४ विस्रंसितः विस्रस्त इत्यर्थः विचुक्रुशुश्चक्रन्
दुरित्यर्थः १५ आवर्त्तयोर्द्वयोर्स्रावः पातः पंचमषष्ठयोरनन्तरं प्रसूतिः स्यादिति वचनात् १६
मन आविवेश मनस्याविर्बभूव नीवामामिव तथा तत्संवेधरित्यर्थः धाम श्रीमूर्त्तिः १७ जगन्मङ्गलं जग
तो मूर्त्तिमन्मङ्गलं अच्युतांशं अच्युता अच्युतिरहिता अंशा ऐश्वर्यादयो यस्य तं यद्वा अच्युतस्यांशे
पाद्वांशो भक्तानुग्रहाय परिच्छिन्नवपुरित्यर्थः समाहितं संक्रमितं मनसैवाहितं वेदेषु दीक्षया अर्पि

संदिष्टैवं भगवता तथेत्योमिति तद्वचः प्रतिगृह्य परिक्रम्य गां गता तत्तथाकरोत् १४ गर्भे प्र
णीते देवक्या रोहिणीं योगनिद्रया अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः १५ भगवा
नपि विश्वात्मा भक्तानामभयंकरः आविवेशांशभागेन मन आनकदुन्दुभेः १६ स बिभ्र
त्पौरुषं धाम भ्राजमानो यथा रविः दुरासदोतिदुर्द्धर्षो भूतानां संबभूव ह १७ ततो जगन्मङ्गल
मच्युतांशं समाहितं शूरसुतेन देवी दधार सर्वात्मकमात्मभूतं काष्ठा यथानन्दकरं मनस्तः
१८ सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे भोजेन्द्रगेहेऽग्निशिखेव रुद्धा सर

तं देवी योगमाया मञ्जुहसतेत्यर्थः सर्वात्मके सर्वस्यात्माने अत एवात्मभूते स्वस्मिन् आदावेव संतं
मनस्तः मनसैव दध्यार धारणया पूर्णवती अत्रानुरूपं दृष्टान्तमाह यथा काष्ठा प्राचीदिक् आनन्द
करं चन्द्रमिति १८ सर्वजगन्निवासस्य श्रीहरेर्निवासभूतापि नितरां सर्वजनाह्लादकतया
न रेजे किं तु स्वयमेवानन्दमन्वभवत् यतः कंसस्य गेहे रुद्धा अन्यैर्न दृश्यते यद्वा दिवि रुद्धा अग्नि
शिखा दीपवत् तथा सतीशोभना सरस्वती ज्ञानवंचके रुद्धा यथान्येषामनुपकारिणी न राज

२९

श्रीराम

प्रभया भवनं विरोचयन्तीं नो अजितं तं तराङ्कृतिमथ्येयस्याः सा नांग्रिम विरोचमानः ध्रुवं हरिरे
वयतः यस्मात्तद्धस्तीरथं पुरा पूर्वं नासीत् २० न न संतिसामादय उपायानेति स्वयमेवाह अथ तं अ
र्थं तेत्रो देवकार्यप्रधानः विक्रमं न विहंति महद्येयं पराक्रमं करिष्यत्येवेत्यर्थः यद्वा न हि इयमिदा
नीमेव हन्यतामिति विचिन्त्याह अथ तं त्रो पि पुमान स्वं विक्रमेन विहंति न नाशयति स्त्रीवधे

नांगीत्यकं सः प्रभया जितोन तरां विरोचयन्तीं भवनं शुचिस्मितां आह हैषमे प्राणहरो हरिर्न
हा ध्रुवं श्रितो यत्न पुरेयमीदृशी २० किमद्य तस्मिन्करणीयमाशु मे यदर्थतन्त्रो न विहंति
विक्रमं स्त्रियाः स्वसुर्गुरुमत्या वधोयं यशः श्रियं हंत्यनकालमायुः २१ स एष जीवन्
खलसंपरेतो वर्तेत यो त्वं न नृपांसितेन देहेमृते तं मनुजाः शपंति गंतानमोयं तनुमा
प्र॰२ निनो ध्रुवं २२ इति घोरतमाज्ञावात्सन्निवृत्तः स्वयंप्रभुः आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरा
नुबंधकृत् २३ आसीनः संविशंस्तिष्ठन्भुंजानः पर्यटन्महीं चिंतयानो हृषीकेशमपश्य
त्तन्मयं जगत् २४ ब्रह्माभवश्च तत्रेत्य मुनिभिर्नारदादिभिः देवैः सानुचरैः साकं गीर्भि

तत्राणः स्यादिति भावः न तदेवाह स्त्रिया इति गुरुमत्या गुर्विण्याः २१ किंच स एष जीवन्नपि मृ
तः स्यात् नृशंसितेन क्रौर्येण यो वर्तेत न तं जीवन्तमेव मनुजाः शपंति दुर्वाक्यैर्धिक्कुर्वंति मृते दे
हे मृते तन्नुमानिनः पापिनो नरकं गच्छंति अथवा शापप्रकारमाह गंतामाति नो अस्य देहेम
नः येयं ध्रुवं मंयं तमो गमिष्यति २२ संविशन् शयानः २३ २४ रम्याभिर्गीर्भिः वृष्णिकामवर्षिणे

प्रतिश्रुतेसत्यंकृतमितिहृष्टाः सत्यत्वेनैवप्रथमेस्तुवंति सत्यव्रतमिति सत्यंव्रतंसंकल्पोयस्य
तं सत्यसंकल्पमित्यर्थः सत्यपरं सत्यंपरंश्रेष्ठंप्राप्तिसाधनंयस्मिन्तं त्रिसत्यंत्रिष्वपिका
लेषु सृष्टेः पूर्वंप्रलयानंतरंचस्थितिसमयेचसत्यंअव्यभिचारेणवर्तमानं तदेवाहुः सत्य।
मयोनिमितिसत्त्वहेतुत्वेनपृथिव्यप्तेजोमित्यक्तहेतुत्वेनवाय्वाकाशौ एवंसच्चत्यच्चसत्यंमूर्तपंचकं
तत्सत्यमित्याचक्षते इतिश्रुतेः तस्ययोनिंकारणं अनेनपूर्ववर्तमानतोक्ता तथासत्येत
स्मिन्नेवनिहितंअंतर्यामितयास्थितंअनेनस्थितिसमयेपिसत्यत्वमुक्तं तथासत्यस्यसत्यं

देवाऊचुः॥ सत्यव्रतंसत्यपरंत्रिसत्यंसत्यस्ययोनिंनिहितंचसत्ये सत्य
स्यसत्यंऋतसत्यनेत्रंसत्यात्मकंत्वांशरणंप्रपन्नाः २६

तस्यैवसत्यस्यसत्यंपारमार्थिकंतत्त्वाशेषत्ववक्ष्यमाणरूपं अनेनप्रलयेप्यबाधितेनसत्यत्वमुक्त
म् एवंत्रिसत्यत्वमुपपादितं तथाऋतसत्यनेत्रम् ऋतंसूनृतावाणी सत्यंसमदर्शनम् त
थाभगवताव्याख्यातंसमानत्वात्सत्यंचसमदर्शने ऋतंचसूनृतावाणीकविभिःपरिकीर्तितेति
तयोर्नेत्रंनयनंसाधकंनेतारंप्रवर्तकमितियावत् एवंसर्वप्रकारेणसत्यात्मकंत्वांभगवन् व
यंशरणंप्रपन्नाःप्राप्ताइति २६ ॥

नच भवंतोपि लोके स्वरूपमनुत्वादेव किमिति मां शरणं प्रपद्यंते नैवं गाढ्यं त्वमेवैकः सर्वस्यास
स्य सृष्ट्यादिकारणं नान्य इत्येतत् एकशरणमेव लोकादिरूपं वृक्षं तच सर्वं तद्व्यतिरेकेण नास्तीति
वृक्षरूपं तत्प्रपंचं वृक्षरूपकेण निरूपयंति एकायन इति असौ प्रपंचरूप आदिवृक्षः दृश्यत इति वा
तः समष्टिव्यष्टिरूपः कथंभूतः एकायनः एकः प्रकृतिरयनमाश्रयो यस्य सः द्वे सुखदुःखे फ
ले यस्य सः त्रयो गुणा मूलानि यस्य सः धर्मार्थकाममोक्षाश्चत्वारो रसा यस्य सः पंचेंद्रियाणि
विज्ञानप्रकारा यस्य षडूर्मयः शोकमोहौ जरामृत्यू क्षुत्पिपासे स्वभावा यस्य सः सप्त धातवः त्वचो यस्य सः

एकायनोसौ द्विफलस्त्रिमूलश्चतूरसः पंचविधः षडात्मा सप्तत्वगष्टविटपो नवाक्षो द
शछदी द्विखगो ह्यादिवृक्षः २७ त्वमेक एवास्य सतः प्रसूतिस्त्वं सन्निधानं त्वमनुग्रहश्च
त्वन्मायया संवृतचेतसस्त्वां पश्यंति नाना न विपश्चितो ये २८

पंचभूतानि मनो बुद्धिरहंकारश्चेत्यष्टौ विटपाः शाखा विस्तारा यस्य सः नव द्वाराणि अक्षाणि छिद्रा
णि यस्य सः दश प्राणाः छदाः पत्राणि विद्यंते यस्य सः दशछदी द्वौ जीवपरमात्मानौ खगौ यस्मिन् द्वि
खगः २७ एवंरूपस्य संसारवृक्षस्य सतः कार्यस्य त्वमेक एव प्रसूतिः प्रकर्षेण सूतिर्जन्म यस्मा
त्स कारणमित्यर्थः त्वं सन्निधानं त्वमेव सन्निधानं सम्यक् निधीयतेऽस्मिन्निति लयस्थानं त्व
मेवानुग्रहः पालकः न तु ब्रह्मादयः प्रसिद्धाः कथमहमिति चेत्तत्राह त्व
न्मायया इति संवृतमपिहितं चेतो ज्ञानं येषां ते त्वामेव नाना पश्यंति ये तु विपश्चितो विद्वांसः

ननु देवकीपुत्रं मां कथमेवं वर्णयथेति चेत्तत्राहुः विभर्षीति अवबोधैकस्वरूप आत्मा त्वं रूपा
णि सत्त्वोपपन्नानि विभर्षि धत्से न तु त्वं कस्यापि पुत्र इत्यर्थः क्षेमाय सत्तां सुखमेव तेनासुखकराणि खला
नामभद्राणि नाशकानि २९ न केवलमेतावदुक्तं मोक्षार्थं समर्थोऽसीत्याहुः त्वयीति त्वयि समा
धिना आवेशितचेतसा निमित्तेन त्वत्पादपोतेनाश्रितेन एके मुख्या विवेकिनः महद्भिः कृतेन से
व्यतया संपादितेन यद्वा इद्धमपि समायामयमित्यनादृत्य तिरपदमेव महत्स्वतोत्कृष्टमिति मन
कृतेन बहुमतेनेत्यर्थः भवाब्धिं तुच्छं कुर्वन्ति अनायासेनैव भजनानन्तरमेव निष्पादिनो नेष्यामुक्तिरित्य

विभर्षि रूपाण्यवबोध आत्मा क्षेमाय लोकस्य चराचरस्य सत्त्वोपपन्नानि सुखावहानि सता
मभद्राणि मुहुः खलानां २९ त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नि समाधिनावेशितचेतसैके
त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिं ३० स्वयं समुत्तीर्य सुदुस्तरं द्युमा-
न्भवार्णवं भीममदभ्रसौहृदाः भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवा

र्थः ३१ ननु तेन पोतेन न चेत्पूर्वे पारं गताः तर्हि इदानीं तन्नानां का गतिस्तत्राहुः स्वयमिति अय
मर्थः हे द्युमन् स्वप्रकाश त्वत्पादपोतसामीप्यमात्रेण भवाब्धौ वत्सपदमात्रे जाते तस्तत्त्री
र्य ते स्वयमेवान्ये घोरं भीमं दुस्तरमपि भवार्णवं समुत्तीर्य भवत्पदाम्भोरुहरूपां नावं अत्रैव नि
धाय भक्तिमार्गं संप्रदायं प्रवर्त्य इत्यर्थः पारं याताः स्वतः किं यतः अदभ्रसौहृदाः सर्वेषु तेषु प्री
तियुक्ताः अनन्तरं भक्तानां तरणाय निधायेति कथं भवत्पदाश्रयणमात्रेणोत्तीर्णाः अत उक्तं भवान् म

[illegible] १८

श्रमा १

भा॰ द॰ पू॰ ११

ननु विवेकिनां किं मद्भजनेन मम कोपवर्हितेनत आह्ह: येन्यइति विमुक्तमानिवयमिति मानिनः न पिमुक्तोस्तत एवासत्तयो भावस्तस्मात्कोरभावादित्यर्थः नविशुद्धा बुद्धिर्येषां ते तथा यद्वा न पिमस्तभावइतिच्छेदः अस्तमनयः वाद्वेषेव अविशुद्धबुद्धयः कृच्छ्रेण बहुजन्मनां तपसा परंपदं मोक्षसंनिहितं सकलतपः फलनादिभिः प्राप्यापः पतंति विघ्नैरभिभूयंते तेन अनादृतो युष्मदं घ्रियैस्ते ३१ ३२ तयी यास्तु नकटा चिदपि पतंतीत्याहु: तथा नेति विनायकविघ्नहेतवः

ये न्येरविंदाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधोनादृतयुष्मदंघ्रयः ३२ तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्द्धसु प्रभो ३३ सत्त्वं विशुद्धं श्रयते भवान्स्थितौ शरीरिणां श्रेयउपायनं वपुः वेदक्रियायोगतपःसमाधिभिस्तवार्हणं येन जनः समीहते ३४

तेषां मनीकानि सैन्यानि यानि येतेषां मूर्द्धसु विचरंति निर्विघ्नान्नमयंतीत्यर्थः ३२ सत्वांस्त्वावहा निरूपाणि धारयसीत्युक्ते विभर्षि रूपाणीति तत्के न प्रकारेणस्त्वावहत्वमित्यपेक्षायामाह्ह: स त्वं विशुद्धमिति सत्त्वं वपुः श्रयतस्तु यत्नयः श्रेयउपायनं कर्मफलदातृ कथं येन वपुषा जनस्तवा र्हणं पूजामीहते करोति कैः वेदश्च क्रियायोगश्च तपश्च समाधिश्च तैश्च त्वदाराधनधर्म्मैरित्यर्थः व

प्रतोक्षप्रयोहीणांसंपवातक्तफलसिद्धिः साक्षादिति ३३

त्वथं वृत्तान्तेत्यादिना श्लोकत्रयेण भगवद्भक्तानामेव मोक्षो नान्येषामित्युक्ते तत्र कर्मफले भक्तिं वि
नाप्यभून्मोक्षस्तस्य तज्ज्ञानैकसाध्यत्वात् किं भक्त्येति साकाङ्क्षायामाह सत्वं न चेदिति हे धातः इदं स
त्वं निजं तव वपुः न भवेच्चेत् हि विज्ञाने विशिष्टमपरोक्षं ज्ञानं न भवेदित्यन्वयः कथंभूते अज्ञानभि
दापमार्जने अज्ञानं च तत्कृता भिदा च तयोरपमार्जने निवर्तके यद्वा अज्ञानेऽभिनत्तीत्यज्ञानभि

सत्वं न चेद्धातरिदं निजं भवेद्धि ज्ञानमज्ञानभिदापमार्जनं
गुणप्रकाशैरनुमीयते भवान्प्रकाशते यस्य च येन वा ।
गुणः २६

त् विज्ञानं मार्जनेनाप्यंशापमार्जनमेवेति ननु तत्र कृष्णानां बुद्ध्यादीनां यतः प्रकाशस्तत्त्वमेवेति ज्ञानं भ
वेदेव न तु गुणप्रकाशैः गुणावच्छिन्नैः प्रकाशैर्भवान्सर्वसाक्षी पूर्णः केवलमनुमीयते कल्प्यते
न तु साक्षात्क्रियत इत्यर्थः अनुमानप्रकारमाह प्रकाशते यस्य च येन वा गुण इति यस्य संबन्धी
त्वेन बुद्ध्यादिर्गुणः प्रकाशते यो गुणसाक्षीत्येवं येन वा बुद्ध्यादिदृष्टेः प्रमात्रा वा स्वीयो गुणः प्रकाशः स्य
र्थः प्रकृष्टं सत्त्वं वपुर्विनापि मेयमानेन तदाकारेण करणेन वा प्रसादेन साक्षात्कारो भवेदिति भावः ति । २६

एवं तावद्भक्तानामभ्युदयापवर्गौ श्रीकृष्णाख्यविभवीनमुक्तं नान्यपि भजनीयानि केवलेन तत्त्वानं शा-
भा॰टी॰ केन तेऽनन्तत्वादनर्कत्वाच्च मनोवचसोरगोचरत्वादित्याहुः न नामरूपे इति गुणाश्च जन्मानि च
पृ॰ कर्माणि च तैर्न निरूपितव्ये निरूपणार्हे न भवतः कुतः अनमेयवर्त्म मार्गो यस्य तव इति तत्रा-
१२ पि हेतुः तस्य साक्षिणः इति न हि साक्षिणस्तत्त्वं मनोवचोगोचरम् इत्यर्थः हे देव वक्ष्यायोतमाना

न नामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः मनोवचोभ्यामनुमेयवर्त्म-
नो देव क्रियायां प्रतियंत्यथापि हि ३६ शृण्वन्गृणन्संस्मरयंश्च चिंतयन्नामानि रूपा-
णि च मंगलानि ते क्रियासु यस्त्वच्चरणारविंदयोराविष्टचेता न भवाय कल्पते ३७ दि-
ष्ट्याहरेऽस्या भवतः पदो भुवो भारोऽपनीतस्तव जन्मनेशितुः दिष्ट्यांकितां त्वत्पदकैः सु-
शोभनैर्द्रक्ष्याम गां द्यां च तवानुकंपितां ३८ ॥

अथापि क्रियायां उपासनादिलक्षणायां तो
प्रतियंति उपासकाः साक्षात्स्वरूपं तिहि प्रसिद्धं ३६ तस्माद्भक्तेव मोक्षस्तु उपसंहरति शृण्वन्नि-
ति अन्यानपि संस्मारयन् क्रियासु देवार्च्चादिकर्मसु ३७ विशेषतः श्रीकृष्णावतारमभिनं-
दंति दिष्ट्येति दिष्ट्या भद्रं न व पदः पादभूतायाः अस्याः तव जन्ममात्रेणापनीत एव किं-
च त्वत्पदकैः कोमलैः पदैः सुशोभनैर्वज्राङ्कुशादिभिः सुलक्षणैः गां दृक्ष्याम द्यां स्वर्गं च तव १२

नवजन्मनाभारोपनीतः इत्युत्तरामममापि किं जीवस्य संसार उक्तः नहि न हीत्याहुः नेति वतहे ईश
अस्मसारिणस्ते जन्मनः कारणं क्रीडां विना न तर्कयामः किं च हे अभयाश्रय न भयं आश्रयतः इति
तथा ततसंक्षेपने हे नित्यमुक्तेत्यर्थः नवजन्मकारणं नास्तीति किं वक्तव्यं यतो जीवात्मन्यपिभ
वादयस्त्वयि विषयेयाः विद्यातया कृता न परमार्थेन सन्तीति ३८ प्रस्तुतं प्रार्थयते मत्स्याश्वेति।

न तेऽभवस्येश भवस्य कारणं विना विनोदं वत तर्कयामहे भवो निरोधः स्थितिरप्यवि
द्ययाकृता यतस्त्वय्यभयाश्रयात्मनि ३९ मत्स्याश्वकच्छपवराहनृसिंहहंसराजन्यवि
प्रविबुधेषु कृतावतारः त्वं पासि नस्त्रिभुवने च यथाधुनेश भारं भुवो हर यदूत्तम वन्दनं ते
४० दिष्ट्याम्ब ते कुक्षिगतः परः पुमान् अंशेन साक्षाद्भगवान्भवाय नः माभूद्भयं भोजप
तेर्मुमूर्षोर्गोप्ता यदूनां भविता तवात्मजः ४१ ॥श्रीशुक उवाच॥ इत्यभिष्टूय पुरुषं यद्रूपम पद्
निदं यथा ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवं ४२ ॥इति श्रीभागवते महापुराणे द
शमस्कंधे गर्भगतविष्णोः कृतब्रह्मस्तुतिर्द्वितीयोऽध्यायः २॥

नः अस्मान् अस्मिन्भुवने च अन्यदा यथा पासि तथाधुनापि पाहीति वन्दनं नमः इति वदन्तः सर्वे शिरोभिः
प्रणमन्ति ४० देवकीं प्रत्याहुः दिष्ट्येति नोऽस्माकं भवाय उद्भवाय साक्षात्परः पुमान् कुक्षिगतः
अतो भयं माभूदिति ४१ यस्य रूपमनिदं सर्वं प्रत्यक्षं ते यथाय यथावत् अस्माभिस्त्वयि ता
एतावि हस्त्वाः स्वतः इति मन्यमाना ब्रह्मेशानौ पुरोधाय पुरतः कृत्वा ययुरिति ४२ ॥इति दशमे

भा·द·
पू·
३

तृतीये निजरूपेणाभिव्यक्तः सन् हरिः स्वयं पितृभ्यां संस्तुतो नीतः कंसभीतेन गोकुले १ अथेति मंगलार्थं यर्हि सर्वगुणोपेतः कालोऽभूत् तदा देवक्यां विष्णुराविरासीदित्यन्वयः श्लोकाष्टकेनान्वयः परमशोभनत्वमेवाह यर्हिस्मादिनाजनो नारायणस्तस्माज्जन्म यस्य प्रजापतेस्तस्य ऋक्षं रोहिणीनक्षत्रं कथंभूतं शांतानि क्रूरत्वानि अश्विन्यादीनि ग्रहास्तारकाश्च यस्मिन्नक्षत्रे यर्हि।

शुक उवाच॥ अथ सर्वगुणोपेतः कालः परमशोभनः यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकं १ दिशः प्रसेदुर्गगनं निर्मलोडुगणोदयं महीमंगलभूयिष्ठपुरग्रामव्रजाकरा २ नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः द्विजालिकुलसंनादस्तवका वनराजयः ३ ववौ वायुः सुखस्पर्शः पुण्यगंधवहः शुचिः अग्नयश्च द्विजातीनां शांतास्तत्र समिंधत ४ मनांस्यासन्प्रसन्नानि साधूनामसुरद्रुहां जायमानेऽजने तस्मिन्नेदुर्दुंदुभयो दिवि ५ जगुः किंनरगंधर्वास्तुष्टुवुः सिद्धचारणाः विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा ६ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः मंदं मंदं जलधरा जगर्जुरनुसागरं ७

ति सर्वत्रान्वयज्ञाते १ निर्मलानामुडुगणानामुदयो यस्मिंस्तत्तथा मंगलभूयिष्ठाः पुरादयो यस्यां सा २ जलरुहैः श्रीः शोभा येषां ते द्विजालिकुलानां संनादा येषु ते स्तवकाः यासु ताः ३ समिंधत आगमोक्त्या समैधंतेति समृद्धिमावभूवुरित्यर्थः ४ असुरद्रुहां कंसादिव्यतिरिक्तानां सर्वप्राणिनां देवानां चेति अजने जन्यमानेन दाश्रासन्नः प्रसवो यस्मिन्समये ७ १२

तमसाउद्भूतेयननमसिपीठे यथायथावत्प्रेक्षरोगोवहूपेण । तमद्भुतंबालकंवसुदेवऐक्षते
ति द्वितीयश्लोकस्यैवान्वयः अद्भुतत्वे हेतुगर्भाणि विशेषणानि अंबुजेक्षणमित्यादीनि श्री
वत्सलक्ष्माणं गलेनशोभतेगलशोभीकौस्तुभोयस्मिंस्तं ॥ परिष्वक्तसहस्रकुंतलंकिरी

निशीथेतमउद्भूतेजायमानेजनार्दने देवक्यांदेवरूपिण्यांविष्णुःसर्वगुहाशयः । आ
विरासीद्यथाप्राच्यांदिशींदुरिवपुष्कलः ॥ तमद्भुतंबालकमंबुजेक्षणंचतुर्भुजंशं
खगदायुदायुधं श्रीवत्सलक्ष्मंगलशोभिकौस्तुभंपीतांबरंसांद्रपयोदसौभगं । महा
र्हवैदूर्यकिरीटकुंडलत्विषापरिष्वक्तसहस्रकुंतलं उद्दामकांच्यंगदकंकणादिभिर्वि
रोचमानंवसुदेवऐक्षत ॥ सविस्मयोत्फुल्लविलोचनोहरिंसुतंविलोक्यानकदुंदुभि
स्तदा कृष्णावतारोत्सवसंभ्रमोस्पृशन्मुदाद्विजेभ्योयुतमाप्लुतोगवां ॥ १२

टकुंडलादीनांत्विषास्फुरत्परिमितकेशमित्यर्थः । विस्मयेनउत्फुल्लेविशालेलोचनेयस्य
सः गवामयुतमस्पृशत्मनसादत्तवान् कंसनिग्रहीतत्वादात्मसंभवान् विस्मयेस्पृष्टोहेतुः
कृष्णावतारेति मुदाप्लुतोव्याप्तःस्नातइतिवा ॥ १२

भा॰ द॰
स्तु॰
१४

कृतधीः स्थिरबुद्धिः १२ प्रथमं पुत्रबुद्ध्यापश्यन्तं तोषयितुमाह अहो विदितोऽसीति कथं विदि-
तोऽसि भवान्प्रकृतेः परः पुरुष इति ननु किमत्राश्चर्यं पुरुषस्य प्रकृतेरन्यत्वादेवेति अत आह
साक्षादिति प्रत्यक्षतः इत्यर्थः ननु त्रिसन्निकर्षं प्रत्यक्षतः उपलभ्यते किं चित्रमित्यत आह केव
लेति केवलश्चासावनुभवश्च आनन्दश्च तदेव स्वरूपं यस्य सः किं च सर्वबुद्धिदृक् न ह्येवंभूतो

अथैनमस्तौदवधार्य पूरुषं परं नताङ्गः कृतधीः कृताञ्जलिः स्वरोचिषा भारत सूतिकागृ
हं विरोचयन्तं गतभीः प्रभाववित् १२ ॥वसुदेव उवाच॥ विदितोऽसि भवान्साक्षात्पुरुषः प्रकृ
तेः परः केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् १३ स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगु
णात्मकं तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे १४

दृश्यो भवतीत्यर्थः १३ ननु देवकीजठरे प्रविष्टस्य किमियमतिस्तुतिः क्रियते अत आह स
एवेति स एव उक्तस्वरूप एव त्वं जठरे प्रविष्ट इत्यर्थः ननु विश्वं सृष्ट्वा तदनुप्रविष्टस्य किमेतदुक्त
मत आह स्वप्रकृत्येति स्वमायया सृष्ट्वा तदनु त्वमप्रविष्ट एवेति ननु तर्हि कथं श्रुत्योच्यते
तत्सृष्ट्वा तदेवानुप्राविशदिति अत आह प्रविष्ट इवेति भाव्यसे निरूप्यसे प्रत्यक्षतो वा सद्रूपे

अत्र दृष्टान्तः यथेति इमे इति विकृता भावाः महदादयो यथा तथेति दृष्टान्तविवरणमिति ते विकृ
तैरिति ते विकृतैः षोडशविकारैः सह सन्निपत्य विकारं जनयन्ति अज्ञो जनयतीति संनिपतने हेतुः यतः
पृथग्भूताः सन्तो नानावीर्या विशिष्टकार्यसमर्था न भवन्तीति १५ अतः सन्निपत्येति एवं समुत्प
द्यानुगताः प्रविष्टा इव दृश्यन्ते न पुनः प्रविष्टाः कुतः उत्पत्तेः प्रागेव कारणतया विद्यमानत्वान्न
तेषामिह सृष्टे कार्ये पश्चात्संभवः प्रवेश इति १६ दार्ष्टान्तिके इति दिशति एवं भवानिति नन्व

यथेमे विकृता भावास्तथा ते विकृतैः सह नानावीर्याः पृथग्भूता विकारं जनयन्ति हि १५
सन्निपत्य समुत्पाद्य दृश्यन्तेऽनुगता इव प्रागेव विद्यमानत्वान्न तेषामिह संभवः १६
एवं भवानव्यक्तमेयलक्षणो ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः अनावृतत्वाद्बहिरन्तरं न ते
सर्वस्य सर्वात्मन आत्मवस्तुनः १७

यद्यहमप्रच्युतस्वरूप एव कारणतया कार्येषु वर्ते तर्हि तेष्विन्द्रियैरहं ममाणो मम ग्रहणं किं
नास्ति तत्राह अव्यक्तमेयलक्षण इति बुद्ध्याद्युपाधिज्ञानेनानुमेयं लक्षणं स्वरूपं यस्य स तैर्गुणै
र्ग्राह्यैः घटादिभिः सह सन्नपि वर्तमानोऽपि तद्गुणाग्रहः तैर्गुणैः सह न गृह्यसे अग्रहे भावः ना
हि ग्राह्यैः सहभावमात्रं ग्रहणे कारणं किन्तु इन्द्रियाणां शक्तिः सा च कार्यैकसमधिगम्या य
या कार्यमेव कल्प्यते अत एव यथा चक्षुषा रूपग्रहणेऽरसादिग्रहणे नास्ति तथैव विषयग्रह

भा-टी यत्तेनचग्रहणानर्हत्वमुक्तमेवसर्वत्रद्विष्टमित्यत्र एवंतावत्प्रागेवविद्यमानत्वात्प्रवेशोनास्ती
पृ त्युक्तं किंच परिच्छिन्नस्यनीरे पत्रादेरिवप्रवेशोभवेत् नत्वनन्ताहतत्वात्परिच्छिन्नत्वेनवहि
१५ रंतरभेदोनास्ति अतः प्रवेशाख्याह अनाहतत्वादिति अनाहतत्वेहेतुमाह सर्वस्येति न।

हिसर्वस्वरूपस्य अन्यदावरकमस्ति सर्वात्मनः नह्येकेनाहतोः न्यस्यात्माभवेत् आत्मवा।
त्तुनस्त्रेति हेतुद्वयं अनस्यात्मत्वात्मनः त्न्यस्यात्मअनति व्याप्नोतीत्यात्मानह्वि व्यापकस्य।

वरणंघटते तथावस्तुनः परमार्थस्यवस्तुन आवरणंनघटतइत्यर्थः तस्मात्तवांतर्यामि
तयाप्रवेशोनमुख्योस्तिअतस्तदंतर्गर्भेप्रवेशः अतः केवलानुभवानंदस्वरूप एवत्वंविदि
तोसीत्याश्चर्यंममभातमित्यर्थः ९ ॥ १५

नन्वेतन्हेतुना चक्षुरूपं प्रपंचस्यावस्तुत्वे नैव तेन तन्न संभवति सत्यत्वेन प्रतीतेरित्याशंक्याह यइति आत्मनो दृश्येषु गुणेषु देहादिषु स्वव्यतिरेकतः आत्मव्यतिरेके सापेक्षत्वकसत्त्वं यद्देहादिष्विति व्यवस्यते निश्चिनोति यः पुमानसः अबुधः अविद्वान् व्यतिरेकादर्शनात् किंच मनीषितेर्विवादितेसति देहादिसर्वं यतः विनाऽनुवादं वाचारंभणमात्रं विना सम्यग्न भवति अतोऽवस्तुत्वेन त्यक्तो बाधितमेव वस्तुबुद्ध्या उपाददत्स्वीकुर्वन्नबुध इत्यर्थः ॥१७॥ एवं परमेश्वरस्वरूपस्य तद्व्यतिरेकेण

यआत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्तमुपाददत्पुमान् ॥१८॥ त्वत्तोऽस्य जन्मस्थितिसंयमान्विभो वदंत्यनीहादगुणादविक्रियात् त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यते गुणैः ॥१९॥ स त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये ॥२०॥

सत्त्वमुक्तं परमेश्वरोपादानत्वादपि तद्व्यतिरेकेणासत्त्वमित्याह त्वत्तोस्येति नचैवं सत्यपि विकारित्वमित्याह अनीहादिति अगुणत्वादनीहत्वं ततोऽविकारित्वमित्यर्थः ननु नीहत्वे कथं कर्तृत्वं कर्तृत्वे वाऽकुतोऽविकारित्वं तत्राह त्वयीश्वरइति ब्रह्मत्वादविकारित्वं ईश्वरत्वात्कर्तृत्वमिति नतेनैतदपि विरुद्धमेव नेत्याह त्वदाश्रयत्वादिति। गुणैः कर्तृत्वादिः त्वयि स्रष्टृत्वादिकर्तृत्वमुपचर्यते गुणाश्रयत्वात् यथा भृत्यकृतं राजनीति ॥१९॥ एवंभूतस्यैव तव यथा विश्वस्थितिसर्गा।

८

भा॰द॰
पू॰
१६

रिरक्षिषुः रक्षितुमिछुः अवतीर्णोसि कुलेनवतीर्णोनमत्रतः साधूनां रक्षणार्थं राजन्यसंज्ञायेः असुरको
टियूथपास्तैर्निर्व्यूह्यमानाः उत्तस्ततश्चाल्यमानाश्चमूः सेनाः निहनिष्यसे संहरिष्यसि २१ किं

त्वमस्यलोकस्यविभोरिरक्षिषुर्गृहेवतीर्णोसिममाखिलेश्वर राजन्यसंज्ञासुरकोटि।
यूथपैर्निर्व्यूह्यमानानिहनिष्यसेचमूः २१ अयंत्वसभ्यस्तवजन्मनौगृहे श्रुत्वाग्रजांस्ते।
न्यवधीत्सुरेश्वर सतेवतारंपुरुषैः समर्प्पितं श्रुत्वाधुनैवाभिसरत्युदायुधः २२॥श्रीशु
कउवाच॥ अथैनमात्मजंवीक्ष्यमहापुरुषलक्षणम् देवकीतमुपाधावत्कंसाद्भीताशु।
चिस्मिता २३

ततथाप्यप्रमत्तेनत्वयाभव्यमित्याह अयंत्विति असभ्यः खलः समर्प्पितं कथितं अभिसर
तिआगमिष्यति २२ उपाधावत्अस्तौत् २३

६

तयिभयशंकैवनावत्रासीतिश्लोकचतुष्टयेमाह देवकी किंचिद्विज्ञापयितुं रूपमिति यतः
किमपि रूपंवस्तुप्राहुर्वेदाः किंतद्वस्तुतदाह अव्यक्तं अत्रहेतुः अद्यं येषांप्राणां किंपरमाणवः न
ब्रह्मबृहत् किंप्रधानंनज्योतिःचेतनं किंवैशेषिकाणामिवज्ञानेगुणे ननिर्गुणं किंमीमां
सकानामिवज्ञानपरिणामिन निर्विकारं किंपुष्कसत्वादीनामिवपाकिविशेषेणापरिणामि
न सत्तामात्रं तर्हिकिंसामान्यं न निर्विशेषं तर्हिकिंकारणतानास्सक्रियं न निरीहंसन्निधि
मात्रेणकारणंएवंभूतंकिमपिकार्यकल्पयद्वस्तुसएवसाक्षात्त्वंविष्णुरिति अपरोक्षमित्याह

देवक्युवाच॥ रूपंयत्तत्प्राहुरव्यक्तमाद्यंब्रह्मज्योतिर्निर्गुणंनि
र्विकारंसत्तामात्रंनिर्विशेषंनिरीहंसत्वंसाक्षाद्विष्णुरध्यात्मदी
पः २४

अध्यात्मदीपइति बुद्ध्यादिकरणसंघातप्रकाशकइत्यर्थः अथवा अव्यक्तेनकेनापिप्रकारे
णअव्यज्यतइत्यव्यक्तं कथंइत्यत्यानावक्तअव्यज्यतइत्याह आद्यंसर्वस्यकार्यस्याद्यं अनादीत्य
र्थः तथाब्रह्मज्योतिर्निर्गुणंनिर्विकारमिति चतुर्भिःपदैर्देशेनप्रकाशेनचगुणेनचवि
कारेणचव्याप्तिंनिराकरोति तथासत्तामात्रमितिविशेषेणनिर्विशेषमितिसामान्येननि
रीहमितिक्रिययाचव्याप्तिंनिराकरोति अन्यत्समानं एवंभूतस्यतवनभयशंकेतिभावः २५

किंच महाप्रलयेप्यवशिष्यमाणत्वादकुतोभयमित्याह नष्टेलोकइति चराचरेलोकेमहाभू
तेषुलीनेषुतेष्वादिभूतंगतेषुतन्मात्रप्रविष्टेषु तस्मिन्नपिव्यक्तेऽव्यक्तंप्रधानंप्राप्ते अशेषात्मा
केप्रधानेसत्ताप्रतायस्यएवंभूतमपिलीनमस्तिपश्चादेवमहोपनीयमितिसः अशेषसंज्ञः शेषसं
ज्ञइतिवा २५ किंच एवंप्रलयहेतुर्योयंकालः एनं हे अव्यक्तबंधो प्रकृतिप्रवर्तकतस्यप्रलयाव

नष्टेलोकेद्विपरार्धावसानेमहाभूतेष्वादिभूतंगतेषु व्यक्तेऽव्यक्तंकालवेगेनयातेभवाने
कः शिष्यतेशेषसंज्ञः २५ योयंकालस्तस्यतेऽव्यक्तबंधोचेष्टामाहुश्चेष्टतेयेनविश्वं नि
मेषादिर्वत्सरांतोमहीयांस्तंत्वेशानंक्षेमधामप्रपद्ये २६ मर्त्योमृत्युव्यालभीतःपलाय
न्लोकान्सर्वान्निर्भयंनाध्यगच्छत् त्वत्पादाब्जंप्राप्ययदृच्छयाद्यस्वस्थःशेतेमृत्युरस्माद
पैति २७

धिभूतस्यतेतवचेष्टांलीलांचेष्टतेविपरिवर्तते पुनःपुनर्वत्सरांतत्वान्महीयानद्विपरार्धरू
पः यस्यचेष्टामाहुः तंत्वांत्वांहेक्षेमधामअभयस्थानंप्रपद्येशरणंव्रजे २६ हेक्षेमधामत्वमेवाह
मर्त्यइति लोकान्प्रतिअटन्ननिर्भयंनप्राप्तः यदृच्छयाकेनापिभाग्योदयेन हेआद्यः २७ १०

प्रत्यन्तं ज्ञापयति सत्वमिति भृत्यानां वित्रासं हंतीति भृत्यवित्रासहा भृत्यविदिति वाक्छेदः पौरु
षं पुरुषं ध्यानधिष्ण्यं ध्यानास्पदं मांसदृशां मांसचक्षुषां प्रत्यक्षं मा कृथाः २८ भवत एव हेतोर्निमि
त्तात्कंसात्समुद्विजे बिभेमि यतो यस्मादधीरधीरविना २९ ३० किमित्युपसंहर्तव्यं एवंभूतेन ।

स त्वं घोरादुग्रसेनात्मजान्नस्त्राहि त्रस्तान्भृत्यवित्रासहासि रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा
प्रत्यक्षं मांसदृशां कृषीष्ठाः २८ जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन समुद्विजे भवद्धेतोः
कंसादहमधीरधीः २९ उपसंहर विश्वात्मन्नदो रूपमलौकिकं शंखचक्रगदापद्मश्रिया जु
ष्टं चतुर्भुजं ३० विश्वं यदेतत्स्वतनौ निशांते यथावकाशं पुरुषः परो भवान् बिभर्ति सो
ऽयं मम गर्भगोऽभूदहो नृलोकस्य विडंबनं हि तत् ३१ ॥श्रीभगवानुवाच॥ त्वमेव पूर्वसर्गेऽभूः
पृश्निः स्वायंभुवे सति तदायं सुतपा नाम प्रजापतिरकल्मषः ३२ युवां वै ब्रह्मणादिष्टौ प्रजा
सर्गे यदा ततः सन्नियम्येंद्रियग्रामं तेपाथे परमं तपः ३३

मया पुत्रेणानवमहती श्लाघा स्यादिति तत्राह विश्वमिति निशांते प्रलयावसाने यथावकाशम
संकोचतः अस्से भावि तेन तादृशपहास्यतैव स्यादित्यर्थः ३१ चतुर्भुजरूपेण विभावे कारणं तावदा
ह त्वमेवेत्यादि चतुर्दशभिः पूर्वसर्गे प्रथमजन्मनि अभूः आसीः पृश्निर्नाम स्वायंभुवे मन्वंतरे ।

भा·द·
टी·
१८

३४ ३५ तप्यतोः आचरतोः ईयुर्गतानि मदात्मनोः मच्चित्तयोः ३६ अमुना वपुषा ३७ प्रादुर्भूतोस्मि
वरदानां श्रेष्ठः वरदेषु श्रेष्ठ इत्यर्थः तेन सकृन्द्वारेण चकारं वा रमाविर्भावे कारणमुक्तं मादृशः मत्सदृशः

वर्षवातातपहिमघर्मकालगुणाननु सहमानौ श्वासरोधविनिर्धूतमनोमलौ ३४ शीर्ण
पर्णानिलाहारावुपशान्तेन चेतसा मत्तः कामानभीप्सन्तौ मदाराधनमीहतुः ३५ एवं वां त
प्यतोस्तीव्रं तपः परमदुष्करम् दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ३६ तदा वां परितु
ष्टोहममुना वपुषानघे तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ३७ प्रादुरासं वरदरा
ड्युवयोः कामदित्सया व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ३८ अजुष्टग्राम्यविष
यावनपत्यौ च दम्पती न वव्राथेपवर्गं मे मोहितौ देवमायया ३९ गते मयि युवां लब्ध्वा वरं म
त्सदृशं सुतं ग्राम्यान्भोगानभुञ्जाथां युवां प्राप्तमनोरथौ ४० अदृष्ट्वान्यतमं लोके शीलौ
दार्यगुणैः समं अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ४१ तयोर्वां पुनरेवाहमदित्या
मास कश्यपात् उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः ४२ तृतीयेस्मिन्भवेहं वै तेनैव
वपुषाथ वां जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ४३

कामस्य दित्सया दातुमिच्छया ३८ मे मत्तो यियुवां अपवर्गं न वव्राथे न वृतवन्तौ ३९ वरं लब्ध्वा म
यि गते सति ४० ४१ अदित्यां कश्यपाद्वामनत्वात् सेनियनदीपितृरूपयोर्युवयोरहमेव पुनरासमि

श्री
हरिः
१८

प्राकृप्रथमेतावदेतद्रूपंमेजन्मेतिस्मरणायत्वानायदर्शितं मद्भावंमहिविषयं अनेनतरंत्वादिछया।
वालोपिभविष्यामीतिभावः ४४ ननुतर्हिप्रसन्नेपिकथमावयोः पुनःपुनर्जन्मेत्यतःपरंनभवि
ष्यतीत्याह युवामिति ४५ ४६ यदिकंसाद्विभेषितर्हिमांगोकुलंनययशोदायाश्चनोकन्यांम
न्मायामानयेतिप्रथममेवभगवताप्रचोदितोवसुदेवोपदागोतमेकुतनदैवअनापियायोगमाया।

एतद्वांदर्शितंरूपंप्राग्जन्मस्मरणायमे नान्यथामद्भवंज्ञानंमर्त्यलिंगेनजन्यते ४४ यु
वांमांपुत्रभावेनब्रह्मभावेनवासकृत् चिंतयंतौकृतस्नेहौयास्येथेमद्गतिंपरां ४५॥श्री
शुकउवाच॥इत्युक्त्वासीद्धरिस्तूष्णींभगवानात्ममायया पित्रोःसंपश्यतोःसद्योबभूवप्रा
कृतःशिशुः ४८ ततश्चशौरिर्भगवत्प्रचोदितः सुतंसमादायससूतिकागृहात् यदा
बहिर्गंतुमियेषतर्ह्यजायायोगमायाजनिनंदजायया ४७ तयाहृतप्रत्ययसर्ववृत्तिषुद्वाः
स्थेषुपौरेष्वपिशायितेष्वथ द्वारस्तुसर्वाःपिहितादुरत्ययाबृहत्कपाटायसकीलशृंख

सानंदजाययानिमित्तभूतयाअजनिजाता ४७ हृताप्रत्ययाश्चक्षोः सर्वावृत्तयोयेषां अथ
वाहृताःप्रत्ययाः अन्याश्चसर्वावृत्तयोयेषांजाग्रतामपितेषांशायितेषुद्वारपालेषुसत्सु बृहत्सुक
पाटेषुलोहकीलकयुक्तशृंखलैःबृहद्भिःकपाटादिभिर्दुरत्यया इतिवा ४८

भा॰ द॰
पु॰
४९

स्वयमेव व्यवर्णितविग्रहेनाऽन्यथा मत्रियेनेतिवक्तव्ये गम्भीरतोयौघजवेनोर्मयस्तेषां फेनिला ५१ गंभीरतोय
स्तेयौघजलस्य जवेन ये ऊर्मयस्तैः फेनिला फेनवती भयानकैरावर्तशतैर्व्याप्तापि श्रियः पतेः ५०

नाः कृष्णस्य गर्भगृहे वसुदेवस्याग्रानने स्वयं व्यवर्णितयथा नमो रवेः ववर्षपर्जन्य उपांशु गर्जितः
शेषोन्वगाद्वारि निवारयन्फणैः ४९ मघोनि वर्षत्यसकृद्यमानुजा गंभीरतोयौघज
वोर्मिफेनिला भयानकावर्तशताकुला नदी मार्गं ददौ सिंधुरिव श्रियः पतेः ५० नं
दव्रजं शौरिरुपेत्य तत्र तान् गोपान्प्रसुप्तानुपलभ्य निद्रया सुतं यशोदाशयने निधाय
तत्सुतामुपादाय पुनर्गृहानगात् ५१ देवक्याः शयने न्यस्य वसुदेवोथ दारिकां प्र
तिमुच्य पदोर्लोहमास्ते पूर्ववदावृतः ५२ यशोदा नंदपत्नी च जातं परमबुध्यत न
तल्लिंगं परिश्रांता निद्रयापगतस्मृतिः ५३ ॥इति श्रीभागवते महापुराणे दशमस्कंधे कृ
ष्णजन्मनि तृतीयोध्यायः॥३॥

निद्रयाऽग्रजया ५१ प्रतिमुच्य बध्वा पदोः पादयोः लोहं निगडं आस्ते स्म ५२ जातं किंचिदिति
केवलमबुध्यत न तु पुत्रः कन्या वेति योगनिद्रयामोहितेनेति ५३ ॥इति श्रीदशमे तृतीयोध्या

वनर्थे चंद्रिकावाक्समाकर्ण्य निभयाकुलः उमैत्रिभिर्हितं मेने कंसो बालादिहिंसनं १ ततश्चा
मंत्रतस्य २ कालो मृत्युः ३ ४ ५ अगाहे भ्रातः ६ दीनदीनवत् दीनादपि दीनवत् नन्तुतया पुत्र

श्रीशुक उवाच॥ बहिरंतःपुरद्वारः सर्वाः पूर्ववदावृताः ततो बालध्वनिं श्रुत्वा गृहपा
लाः समुत्थिताः १ ते तु तूर्णमुपव्रज्य देवक्या गर्भजन्म तत् आचख्युर्भोजराजाय यदुद्विग्नः
प्रतीक्षते २ स तल्पात्तूर्णमुत्थाय कालोयमिति विह्वलः सूतीगृहमगात्तूर्णं प्रस्खलन्मु
क्तमूर्द्धजः ३ तमाह भ्रातरं देवी कृपणा करुणं सती स्नुषेयं तव कल्याण स्त्रियं मा हंतुम
र्हसि ४ बहवो हिंसिता भ्रातः शिशवः पावकोपमाः त्वया दैवनिसृष्टेन पुत्रिकैका प्रदी
यतां ५ नन्वहं ते ह्यवरजा दीना हतसुता प्रभो दातुमर्हसि मंदाया अंग मे चरमां प्रजां ६॥
शुक उ॥ उपगुह्यात्मजामेवं रुदत्या दीनदीनवत् याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे
खलः ७ तां गृहीत्वा चरणयोर्जातमात्रां स्वसुः सुतां अपोथयच्छिलापृष्ठे स्वार्थोन्मूलित
सौहृदः ८ सा तद्धस्तात्समुत्पत्य सद्यो देव्यंबरं गता अदृश्यतानुजा विष्णोः सायुधाष्टम
हाभुजा ९ दिव्यस्रगंबरालेपरत्नाभरणभूषिता धनुःशूलेषुचर्मासिशंखचक्रगदा
धरा १० सिद्धचारणगंधर्वैरप्सरःकिन्नरोरगैः उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ११

स्नान्यत्र नीतत्वान्मात्वयोगमायेति तान तान् याचितोऽपि मया विच्छिदेत्याकृष्य जग्राह ७ अपो

भा॰द॰ कृपणानिति अयानशिशून हनिष्यतीति ज्ञात्वा वारयति पाठांतरे मामां कृपणां कृपयाः हिंसीः हिं
पू॰ सितवानसीति १ बहूनामनिकेतेषु वासरात्सात्हिस्थानेषु ३ परमविस्मितः कथं देवीवाणा
२॰ न्नतान्नतेति ४ भामहेभगिनीभर्तः पुरुषादोराक्षसोयथावासापत्यमेवहिनस्तितद्वत् ५ जी

पुकउवाच १

किंमयाहतयामंदज्ञातः खेलतवांतकृत यत्रकुवापूर्वेशत्रुर्माहिंसीः कृपणान्नृथा ४ १
इतिप्रभाष्यतंदेवीमायाभगवतीभवि बहुनामनिकेतेषुबहुनामावभूवह ३ तयाभि
हितमाकर्ण्यकंसःपरमविस्मितः देवकींवसुदेवंचविमुच्यप्रश्रतोब्रवीत् ४ अहोभ कंसउवाच ३
गिन्यहोभाममयावांवतपाप्मना पुरुषादइवापत्यंबहवोहिंसिताःसुताः ५ सत्वहं
त्यक्तकारुण्यस्त्यक्तज्ञातिसुहृत्खलः कान्लोकान्वैगमिष्यामिब्रह्महेवमृतःश्वा
सन् ६ दैवमप्यनृतंवक्तिनमर्त्याएवकेवलं यद्विश्रंभाद्दहंपापःस्वसुर्निहतवान्
शिशून् ७ माशोचतंमहाभागावात्मजान्स्वकृतंभुजः जंतवोनसदैकत्रदैवाधीनाः
सदासते ८

वस्मृपिसृतोहम् ६ ७ हेमहाभागौस्वकृतंभुजःस्वारब्धकर्मभोक्तृन् किंचजंतवःप्राणिनः
सदानासतेकिंच अल्पकालमेव तदापिएकत्रनासते किंतु विशंत्यनेयतोदैवाधीनाः २॰
१८

सदानास्तीत्यनेनयदुक्तंजन्ममरणादितदपिदेहानामेवनात्मनइत्याह भवीति भूतानिदे
हाएवयांतिअपयांतिचभवंतिनभवंतिचेत्यर्थः यथाभवविभौमानिघटादीनिनद्दृत यतेषुभूते
षुजन्मादिभिर्विक्रियमाणेषुअयमपरोततयाप्रत्यभिज्ञायमानोनविपर्येतिविपर्ययंनप्राप्नोति ए
करूपएववर्ततइत्यर्थः भौमेषुविक्रियमाणेषुयथाभूस्तथेति १९ एवंविचार्यमाणेसतिना
शोकार्यवकाशः अज्ञानतस्तुनैनिवर्ततइत्याह यथेति यथायथावत् अनेवंविदः एवम

भवविभौमानिभूतानियथायांत्यपयांतिच नायमात्मातथैतेषुविपर्यैतियथैवभूः १९
यथानैवंविदोभेदोयतआत्मविपर्ययः देहयोगवियोगौचसंसृतिर्नैनिवर्तते २० तस्मै
द्दृष्टेस्वतनयात्मयाख्यापादितानपि मान्नघ्नोवयतःसर्वःस्वकृतंविंदतेवपुः २१

ज्ञानतःआत्मविपर्ययःदेहात्मबुद्धिर्भवति यतोविपर्ययाद्भेदोभवति देहाहंकारेणह्यात्मनि
परिच्छिन्नेसतीदेकारणसदैभिन्नंभवति यतोभेदात्पुत्रादिदेहैर्योगश्चवियोगश्च ततःसंसृतिः
संसारःविद्गुनियावदज्ञानंतननिवर्ततइत्यर्थः २० एवंबकप्रकारेणनैनेततवननयाः अहंतत्वा
नज्ञातितवान् तथापिअज्ञानहृष्टास्वतनयाख्यापादितानपिमानघ्नोवैति मोवयतितस्मादि
तिअज्ञानाश्रयमेवकर्मैतदमाह यतइति २१ ॥

भा॰ पु॰ २१

कथंतर्हि ब्राह्मणादिदेहंनस्तं इत्यस्य चप्रायश्चित्तश्रवणे अज्ञानमूलमेवेत्याह यावदिति अस्वदृ-
क् देहाभिमानी तदभिमानीति तस्य देहस्य हननमात्मनि अध्यमन्यमानः इत्यर्थः २२ श्यालः कंसः
स्वस्रोरिति स्वसृशब्देन द्विवचनानुपपत्त्या मिथुनग्रहणद्वारा मिथुनिलक्षणया स्वसृतत्पत्योरभि।
धाने लिंगसमवायेन प्राणभृत उपदधातीतिवत् देवकीवसुदेवयोः प्रत्येकं पादमग्रहीदित्य।

यावद्धतोस्मि हंतास्मीत्यात्मानं मन्यतेऽस्वदृक् तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात्
२२ क्षमध्वं मम दौरात्म्यं साधवो दीनवत्सलाः इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथा
ग्रहीत् २३ मोचयामास निगडाद्विस्रब्धः कन्यकागिरा देवकीं वसुदेवं च दर्शयन्नात्मसौ
वसुदेवउ० हृदं २४ भ्रातुः समनुतप्तस्य क्षांतरोषा च देवकी व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह।
२५ एवमेतन्महाभाग यथा वदसि देहिनां अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः २६
शोकहर्षभयद्वेषलोभमोहमदान्विताः मिथो घ्नंतं न पश्यंति भावैर्भावं पृथग्दृशः २७ शुकउ०
कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः देवकीवसुदेवाभ्यामनुज्ञातोविशद्गृहं २८

र्थः श्यालशब्देन कथंचिद्वसुदेवाभिधानं वा २३ आत्मसौहृदं प्रियवादादिना दर्शयन् २४ २५
२६ स्वपरभेददर्शने किं भवति तदाह शोकहर्षेति भावैरेव निमित्तभूतैर्मिथो भावान् घ्नंतो।
भावमीश्वरं पृथग्दृशस्तेन पश्यंति किंत्वहमेव हंता हतश्चेति मन्यंत इत्यर्थः २७ विशुद्धं य

२१

२९ नातिकोविदाः दृष्टमात्रमतयः नदीर्घदर्शिनः ३० ननिर्गतानि दशादिनानि येषां तान् अन्यां
श्च ३१ ३२ अस्यतः क्षिपतः सतः उत्सृज्य रणं त्यक्त्वा ३३ ३४ अन्यासक्तान् विमुखांश्च तानि न हंसि
न हिनस्ति ३५ क्षेमे निर्भयदेशे शूरैः संयुगादन्यत्र विकत्थनैः प्रौढिवादो येषां तैः ननु हरेर्बिभेमि

तस्यां

श्रीशुक उवाच॥ अस्यां रात्र्यां व्यतीतायां कंसश्चाहूय मंत्रिणः तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनि
द्रया २९ आकर्ण्य भर्तुर्गदितं तमूचुर्देवशत्रवः देवान्प्रतिकृतामर्षा दैतेया नातिकोविदाः
३० एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजादिषु अनिर्दशान्निर्दशांश्च हनिष्यामोऽद्य वै शिशून् ३१
किमुद्यमैः करिष्यंति देवाः समरभीरवः नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ३२ अस्य
तस्ते शरव्रातैर्हन्यमानाः समंततः जिजीविषव उत्सृज्य पलायनपरा ययुः ३३ केचित्प्रा
ञ्जलयो दीना न्यस्तशस्त्रा दिवौकसः मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ३४ न
त्वं विस्मृतशस्त्रास्त्रान् विरथान् भयसंवृतान् हंस्यन्यासक्तविमुखान् भग्नचापानयुध्यतः
३५ किं क्षेमशूरैर्विबुधैरसंयुगविकत्थनैः रहोजुषा किं हरिणा शंभुना वा वनौकसा किं
मिंद्रेणाल्पवीर्येण ब्रह्मणा वा तपस्यता ३६

शंभोश्चेतिचेत्तत्राह रहोजुषेति सर्वस्याप्यंतःप्रविष्टेन क्वचिदपि बहिरदृष्टेनेत्यर्थः पुरुषप्रवे
शाद्रहितमिलावृतं वनमोकोयस्य तेन शंभुना वा ३६ ॥

यद्यप्यमी देवा न किंचिदपि कर्तुं समर्थास्तथापि नीतिरनुसर्तव्यैवेत्याहुः तथापीति ३७ रूढपदः
बद्धमूलः ३८ देवानां मूले विष्णुः स च यत्र धर्मस्तत्रास्ते धर्मस्य मूलं वेदादय इति ३९ ४० ४१ किंच वि

तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ततस्तन्मूलखनने नियुंक्ष्वास्माननुव्रतान् ३७ यथा
मयोंगे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुं यथेंद्रियग्राम उपेक्षितस्तथा रिपु
र्महान्बद्धबलो न चाल्यते ३८ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः तस्य च ब्रह्मगोविप्रा
स्तपो यज्ञाः सदक्षिणाः ३९ तस्मात्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः तपस्विनो यज्ञशी
लान्गाश्च हन्मो हविर्दुघाः ४० विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः श्रद्धा दया तिति
क्षा च क्रतवश्च हरेस्तनूः ४१ स हि सर्वसुराध्यक्षो ह्यसुरद्विड्गुहाशयः तन्मूला देवताः स
र्वाः सेश्वराः सचतुर्मुखाः अयं वै तद्वधोपायो यदृषीणां विहिंसनं ४२ ॥श्रीशुक उवाच॥ एवं
दुर्मंत्रिभिः कंसः सह संमंत्र्य दुर्मतिः ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः ४३ संदि
श्य साधुलोकस्य कदने कदनप्रियान् कामरूपधरान्दिक्षु दानवान्गृहमाविशत् ४४ ते
वै रजःप्रकृतयस्तमसा मूढचेतसः सतां विद्वेषमाचेरुरारादागतमृत्यवः ४५ आयुः श्रियं
यशो धर्मं लोकानाशिष एव च हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ४६ ॥इति श्रीदशम
स्कंधे चतुर्थोऽध्यायः ॥४॥

प्रादयो हरेरेव तनवो यस्मात्तस्मात्तद्वध एवोपाय इत्याहुः अयमिति ४२ ४४ आरात्समीपमागतो
मृत्युर्येषां ते ४५ सतां विद्वेषो न मृत्युमात्रहेतुः किंतु बह्वनर्थकारीत्याह आयुः श्रियमिति ४६

पंचमे जातकं नंदः सूनोः कृत्वा महोत्सवं गत्वाथ मथुरां प्राप्य वसुदेवाग्रमोत्सवं १ सहायमनाश्र
दाश्वितः १ २ नियुते द्वे लक्षे सप्त तिलपर्वतान्प्रादात् कथंभूतान् रत्नौघैः रत्नसमूहैः शा
तकौंभांबरैः सुवर्णवस्त्रैः संवरैश्चावृतान् ३ द्रव्याणां गोहिरण्यादीनां मध्ये केषांचिद्दानैरे
व शुद्धिर्यथा नत्वादानादि गुनः जातकर्मादि संस्कारैरेव गर्भाणां शुद्धिरिति दर्शयितुं प्रति नियता

श्रीशुक उवाच ॥ नंदस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः आहूय विप्रान्वेदज्ञान्स्नातः शु
चिरलंकृतः १ वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै कारयामास विधिवत्पितृदेवा
र्चनं तथा २ धेनूनां नियुते प्रादात् विप्रेभ्यः समलंकृते तिलाद्रीन्सप्तरत्नौघशातकौं
भांबरावृतान् ३ कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया शुध्यंति दानैः संतुष्ट्या द्रव्या
ण्यात्मात्मविद्यया ४ सौमंगल्यगिरो विप्राः सूतमागधवंदिनः गायकाश्च जगुर्नेदुर्भे
र्यो दुंदुभयो मुहुः ५

नियतोधकानि दृष्टांतत्वेनोदाहरति कालेनेति कालेन भूम्यादि स्नानेन देहादि शौचेनामे
ध्यलिप्तादि संस्कारैर्गर्भादि तपसेंद्रियादि इज्यया ब्राह्मणादि दानैर्द्रव्याणि संतुष्ट्या मनः आ
त्मा आत्मविद्ययेति ४ सौमंगल्यगिरः स्वस्तिवाचका विप्रा यद्योव भूवुः नेदुः सूताः पौराणिकाः
प्रोक्ता मागधाः वंशशंसकाः वंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ५ ॥

संसृष्टानि संसिक्तानि द्वाराणि अजिराणि अंगनानि गृहांतराणि गृहमध्यानि च यस्मिन् स तथा चित्र
भा॰ द॰ ध्वजपताकास्रक्चैलपल्लवतोरणानि च तैर्भूषितः ६ हरिद्रातैलरूषिताः लिप्ताः विचित्रा
पू॰ धातवश्च बर्हस्रजश्च वस्त्राणि च कांचनमालाश्च अलंकारा यया विद्यन्ते येषां ते तथा आभूता गावादयो व
३३ भूवुरित्यर्थः ७ ८ आकल्पाः अलंकाराः ९ नवकुंकुमकिंजल्कैर्मुखपंकजेषु भूतिः श्रीर्यासां

व्रजः संमृष्टसंसिक्तद्वाराजिरगृहांतरः चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ६ गावो
वृषा वत्सतरा हरिद्रातैलरूषिताः विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ७ महार्ह
वस्त्राभरणकंचुकोष्णीषभूषिताः गोपाः समाययू राजन्नानोपायनपाणयः ८ गोप्य
श्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवं आत्मानं भूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ९
नवकुंकुमकिंजल्कमुखपंकजभूतयः बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः १०
गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः नंदालयं स
वलया व्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः ११ ता आशिषः प्रयुंजानाश्चिरं पाही
ति बालकं हरिद्राचूर्णतैलाद्भिः सिंचंत्योजनमुज्जगुः १२

ताः बलिभिः उपायनपात्रैः १० सुमृष्टानि उज्ज्वलितानि मणिमयानि कुंडलानि यासां निष्काः पद
कानि कंठेषु यासां ताश्च शिखाभ्यः च्युतानि माल्यवर्षाणि यासां ताः नंदालयं व्रजतीः व्रजंत्यः पथि
विरेजुः सवलयाः कंकणभूषिताः व्यालोलैः चंचलैः कुंडलादिभिः शोभा यासां ताः ११ जनेषु सिं
चंत्यः अजनमुज्जगुरिति च १२ ३३

१३ १४ तेभ्यः प्रादात् १५ यथोचितमन्यानपि अभ्यर्चयत् १६ १७ हरेर्निवासेन ये आत्मनि गुणाः
सर्वप्रियत्वादयस्तैः रमायाः आक्रीडं विहारस्थानं १८ वार्षिकं प्रतिवर्षं देयं १९ मानदं सत्कारं नंद

अवादयंत विचित्राणि वादित्राणि महोत्सवे कृष्णे विश्वेश्वरेनंते नंदस्य व्रजमागते १३ गो-
पाः परस्परं हृष्टा दधिक्षीरघृतांबुभिः आसिंचंतो विलिंपंतो नवनीतैश्च चिक्षिपुः १४
नंदो महामनास्तेभ्यो वासोलंकारगोधनं सूतमागधवंदिभ्यो येन्ये विद्योपजीविनः १५ तै-
स्तैः कामैरदीनात्मा यथोचितमपूजयत् विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च १६ रोहि-
णी च महाभागा नंदगोपाभिनंदिता व्यचरद्दिव्यवासःस्रक्कंठाभरणभूषिता १७ तत-
आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप १८ गोपान्गो-
कुलरक्षायां निरूप्य मथुरां गतः नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह १९ वसुदेव-
उपश्रुत्य भ्रातरं नंदमागतं ज्ञात्वा दत्तकरं दातुं कुरूद्वह १९ वसुदेव उपश्रुत्य भ्रातरं नंदमा-
गतं ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनं २० तं दृष्ट्वा सहसोत्थाय देहः प्राणमिवागतं प्रीतः
प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः २१ पूजितः सुखमासीनः पृष्ट्वानामयमादृतः प्रसक्त-
रा धीः स्वात्मजयोरिदमाह विशांपते २२ दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते प्रजाशाया
निवृत्तस्य प्रजा यत्समपद्यत २३ दिष्ट्या संसारचक्रेस्मिन्वर्तमानः पुनर्भवः उपलब्धो भवा-

मोचनं तस्य वसतिस्थानं २४ पुनर्भवः पुनर्जातः उत्पन्नः तद्धेतुः गर्भविशेषणं संसारचक्रे वर्तमान इति

भा॰ द॰
५४

दुर्लभत्वमेवाह नैकत्रेति प्रियस्यासीत्संवासः प्रियसंवासः हे प्रियेति वा स्रोतसश्चोघेन नीयमा
नानां प्लवानामिति प्लवाः तृणकाष्ठादयस्ते यथा एकत्र स्थितिं नो लभन्ते २५ कच्चिदिति पशव्या
दिरूपे तस्मिन्वने निर्दोषगोपयोर्दृष्ट्यादि प्रभृतगोपिकास्तन्यादिना पुत्रदेह विवक्षया पृच्छति प्रसक्त
धीः स्वात्मजयोरित्युक्तमात्र २६ भवद्भ्यामुपलालितः सन्कच्चिद्वर्त्तत इति शेषः २७ पुत्रादर्शनक्ले
शेनाह पुंस इति सुहृदो वै पुनः पुनरनुभावितः संपादितो यस्त्रिवर्गः स हि पुंसो विहितः उक्तः शास्त्रे।

नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणां । ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा २५
कच्चित्पशव्यं निरुजं भूर्य्यम्बुतृणवीरुधं । बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः २६ भ्रातर्मम
सुतः कच्चिन्मात्रा सह भवद्व्रजे । तातं भवन्तं मन्वानो भवद्भ्यामुपलालितः २७ पुंसस्त्रिवर्गो
विहितः सुहृदो ह्यनुभावितः । न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते २८ ॥नंद उवाच॥
अहो ते देवकीपुत्राः कंसेन बहवो हताः । एकावशिष्टावरजा कन्या सापि दिवंगता २९ नूनं
ह्यदृष्टनिष्ठोऽयमदृष्टपरमो जनः । अदृष्टमात्मनस्तत्त्वं यो वेद न स मुह्यति ३० ॥

एवाप्रोक्तः न स्वमात्रपर्यवसितः अतस्तेषु क्लिश्यमानेषु स त्वायन भवतीत्यर्थः २८ नंदो वसुदे
वं सांत्वयन्नाह अहो इति २९ अदृष्टे एव निष्ठा समाप्तिर्यस्य सः यद्देवपुत्रादि सान्त्वशब्दे अदृष्टेही यते
न दैव ते पुत्रादयो न भवंतीत्यर्थः अदृष्टपरमः तथा अदृष्टमेव परमं यस्य सः यद्यपि पुत्रादयो वि[illegible]
कोस्त्वयापि ना अदृष्टमेव पुनः संभवतीत्यर्थः एवमदृष्टमात्मनस्तत्त्वं अव्यभिचारिकारणं साक्ष

तस्मादिदानीं त्वयानंदः त्वंभावनीयस्तन्नामपि वियुक्तानामपि च कालांतरे दर्शनयोः संभवात्तत्र
सहादिभिरपि कालांतरे न हि योगसत्यपीति नेदम्य दैवीवारणाभाविसूचिकानां त्वाव सदेवो
रुः वित्यक्तानेदमाह करोवैरिति वःपुत्राभिः ३२ ॥दशमेपंचमः॥ बहूनां सत्त्वश्रेणिरानंदो व्रजेगोकुल
स्वलोपरथि दृष्टानराहसीनत्स्यामतंत्र्युग्ग्रतावचविस्मितः १ २ कृष्णविषये शंकमानेनराजानंप्र

वसदेवउवाच॥ करोवैवार्षिकोदत्तोराज्ञेदृष्टावयंचवः नेहस्थेयंबहुतिथंसंत्युत्पाताश्चगो
कुले ३१ ॥श्रीशुकउवाच॥ इतिनंदादयोगोपाः प्रोक्तास्तेशौरिणाययुः अनोभिरनडुद्युक्तै
स्तमनुज्ञाप्यगोकुले ३२ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेवसदेवसंगमोनामपंचमो
ध्यायः॥५॥श्रीशुकउवाच॥ नंदःपथिवचःशौरेर्नमृषेतिविचिंतयन् हरिंजगामशरण
मुत्पातागमशंकितः १ कंसेनप्रहिताघोरापूतनाबालघातिनी शिशूंश्चचारनिघ्नंती
पुरग्रामव्रजादिषु २ नयत्रश्रवणादीनिरक्षोघ्नानिस्वकर्मसु कुर्वंतिसात्वतांभर्तुर्या
तुधान्यश्चतत्रहि ३ साखेचर्येकदोत्पत्यपूतनानंदगोकुलं योषित्वामाययात्मानंप्रावि
शत्कामचारिणी ४

प्रतिग्रविषये मद्भुतासेवमारिष्यतीति स्वचयन्नाह नयत्रेति यत्र श्रीकृष्णस्य श्रवणादीनि न संति त
त्रैव तासां प्रभावः सा तान स्मिन्नेव सतिका शंकेति भावः ३ योषित्वा वेषितो वरां नारीमिव आत्मा
नं विधाय ननु निलेना निर्विशंकाचमनी कथं परमं मनिम्प्रविष्टा अत आह कामचारिणीति

नहिकामचारिणी छिद्रं विनिर्गमार्थः ५

भा॰ द॰ पू॰ २५

नो वनितां पतिं द्रष्टुमागतां अतिरूपवतीं श्रियमिव गोप्योऽमंसत तेन पूतनारूपो केनान्वयः श्रीसाम्या।
र्थानि विशेषणानि केशबन्धव्यतिषक्तमल्लिकां यस्मिंस्तं सक्तमल्लिकाकुसुमां बृहन्नितम्बेन स्त
नाभ्यां च दुर्भरत्वेन आक्रान्तमिव कृच्छ्रं कृशं मध्यं मध्यमं यस्यास्तां सुवाससं रमणीये वाससी यस्यास्तां
कल्पितयोः कर्णभूषणयोः त्विषा उल्लसद्भिः कुन्तलैर्मण्डितमाननं यस्यास्तां ५ वल्गुस्मितापाङ्ग
विसर्गवीक्षितैः वल्गु रम्यं स्मितं येषु तेन तथाभूता अपाङ्गविसर्गा येषु तैर्वीक्षितैर्व्रजौकसां मनो ह

तां केशबन्धव्यतिषक्तमल्लिकां बृहन्नितम्बस्तनकृच्छ्रमध्यमां सुवाससं कल्पितकर्णभूष
णत्विषोल्लसत्कुन्तलमण्डिताननां ५ वल्गुस्मितापाङ्गविसर्गवीक्षितैर्मनो हरन्तीं वनि
तां व्रजौकसां अमंसताम्भोजकरेण रूपिणीं गोप्यः श्रियं द्रष्टुमिवागतां पतिं ६ बालग्र
हस्तत्र विचिन्वती शिशून् यदृच्छया नन्दगृहेऽसदन्तकं बालं प्रतिच्छन्ननिजोरुतेजसं द
दर्श तल्पेऽग्निमिवाहितं भसि ७ विबुध्य तां बालकमारिकाग्रहं चराचरात्मास निमीलिते

क्षणः अनन्तमारोपयदङ्कमन्तकं यथोरगं सुप्तमबुद्धिरज्जुधीः

क्षणः अनन्तो गोपा हन्त मनस्त्वेन तां न निवारितवन्तः तत्कं भवति गोप्यश्च श्रियमिव तां मत्वा स्त्रीमास
न अतः केनाप्यनिवारिता सती प्रविवेशेति भावः ६ बालग्रहः पूतना असदन्तकं बालं ददर्श पो
असतां मन्तकं दुष्टानां कदनं विमेतित्याह प्रतिच्छन्ननिजोरुतेजसं बालभावेन प्रतिच्छन्नं तिरो
हितं निजमुरुतेजो येन तं कमिव भस्मनि भस्मन्याहितमग्निमिवेति ७ चराचरात्मा देवनो विबु
ध्य निमीलितेक्षणश्चास स्वयमनन्तं दुष्टानामन्तकं सोऽङ्कमारोपयत् बालेमत्वा यथोरगं सुप्तम

नवयशोदायोहितएवोलोकथंनन्यवारयेणोनत्राह नामिति वामेवलाजननन्यास्ववेहितेयस्यासोवा
सिवयंचसहहसेव अंतराणहमथेवीरस्य अंनस्तेनापवहिर्मार्हवेवहृणानः कोशपरिछदासिवत ।
मट्टविचित्रवर्ममयःकोशःपरिछदः आवरणंयस्यअसेःखङ्गस्यनद्वत तत्रभयाचयर्षितेअभि
मतेअहमस्यजननीइयंचेतिमोहितेचसत्योजननीजनन्योनिरीक्ष्यमाणेएवकेवलमतिष्ठतां

तोतौत्यापिचितामतिवामचेहितावीत्यांतरंकोशपरिछदासिवत वरस्त्रियंतत्रभयाचयर्षि
तेनिरीक्ष्यमाणेजननीव्यतिष्ठतां ९ तस्मिंस्तनेदुर्जरवीर्यमल्लवणेयोरेकमादायशिशोट
दावथ गाढंकराभ्यांभगवान्प्रपीडनतप्राणैःसमंरोषसमन्वितोपिवत ९ सामंचमंगाल
मितिश्रमाषिणीतिः पीडमानाविललीवमर्मणि विहृन्यनेत्रेचरणेभजौमहुर्निःक्षिप्त
गात्रातिपतीहरोदह ११ तस्याःस्वनेनातिगंभीरंहसासाद्रिर्महीद्यौश्चचचालसग्रहा रसा
दिशाश्चप्रतिनेदिरेजनाःपेतःक्षितौवज्रनिपातनशंकया १२

नातुनिवारितवत्यौ ९ तस्मिन्स्तनेदुर्जरवीर्येविषयस्मिन्नंतस्तने तेश्रीकृष्णंअंकमादायतस्से
शिशावेटदो अथअनंतरमेव प्रपीड्यकेवलंविषमपय्यमितिमत्वेवतस्याःप्राणैःसहापिवत ९
वरणोभुजौवमुहुर्महुःक्षिपंतीतिःक्षिप्तानिस्वेदयुक्तानिगात्राणियस्याःसा ११ रसारसाता
लमिव १२

व्यादायप्रसार्य विहृत्य निजरूपं आस्थिता मरणसमये कपटमयुक्तमितीव १३ पतन्नपि तस्या देहः ष
भा॰ द॰ ड्क्रोशमध्यवर्तिनो द्रुमांश्चूर्णीचकार १४ ईशामात्रोग्रदंष्ट्रास्यं ईषा लांगलदंडः तत्प्रमाणा उग्रा दं
पू॰ ष्ट्रा यस्मिन् तत् तथाभूतमास्यं यस्मिन् तत् तस्याः कलेवरं वीक्ष्य गोपा गोप्यश्च संत्रस्ताः संत्रासहेतुत्वे
२६ न पुनरङ्गैः यद्वै विशिनष्टि गिरिकंदरवन्नासिके यस्मिंस्तत् गिरेः च्युतौ स्थूलौ ताविव स्त।

निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि प्रसार्य गोष्ठे निजरूप
मास्थिता वज्राहतो वृत्र इवापतन्नृप १३ पतमानोपि तद्देहस्त्रिगव्यूत्यंतरद्रुमान् चूर्णया
मास राजेंद्र महदासीत्तदद्भुतं १४ ईषामात्रोग्रदंष्ट्रास्यं गिरिकंदरनासिकं गंडशैलस्तनं।
रौद्रं प्रकीर्णारुणमूर्द्धजं १५ अंधकूपगभीराक्षं पुलिनारोहभीषणं बद्धसेतुभुजोर्वंघ्रिशू
न्यतोयह्रदोदरं १६ संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरं पूर्वं तु तन्निःस्वनितभिन्नहृत्क
र्णमस्तकाः १७

नौ यस्मिन् तत् रौद्रं घोरं प्रकीर्णा अरुणा मूर्द्धजा यस्मिन् तत् १५ अंधकूपाविव गभीरे अक्षिणी
यस्मिन् तत् पुलिनवदारोहौ जघने नितम्बौ ताभ्यां भीषणं बद्धाः सेतव इव भुजौ ऊरू अंघ्री यस्मिन् तत्
शून्यतोयह्रदवदुदरं यस्मिन् तत् तदुति १६ पूर्वमेव तस्याः शब्देन भीताः पुनर्दर्शनेन अतित्रस्ता इति
त्याह पूर्वं त्विति तस्याः निःस्वनितेन शब्देन भिन्नानि हृत्कर्णमस्तकानि येषां ते १७
‖ ‖ ‖ २६

१८ १९ द्वादशांगेषु ललाटादिषु केशवादिद्वादशनामभिः २० अनाचान्ता एव प्रथममतिसंभ्रमेणैव
वत्साऽकृत्वा किंचित्तुष्णीमासाः पुनस्तान्येव बीजन्यासमकुर्वतेत्याह संस्पृष्टसलिलाः आचान्ताः
आत्मनि प्रथममंगेषु करयोश्च पृथक् अजाद्येकादशबीजानां मध्ये करशुद्धौ त्रीणि करयोः संधि
षु चत्वारि चत्वारि तथा अंगे आदावेकैकस्मिन्नंगेषु अजाद्यैकैकबीजन्यासं बालस्याप्यंगेषु तथैव

बालेवन्यस्याउरसि क्रीडंतमकुतोभयं गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः १८ यशोदा
रोहिणीभ्यां ताः समं बालस्य सर्वतः रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः १९ गोमू
त्रेण स्नापयित्वा पुनर्गोरजसार्भकं रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः २० गोप्यः
संस्पृष्टसलिला अंगेषु करयोः पृथक् न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत २१ अ
व्यादजोऽङ्घ्रिं मणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः हृत्केशवस्त्वदुर
ईश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं २२ चक्र्यग्रतः सहगदो हरिरस्तु पश्चा
त्त्वत्पार्श्वयोर्धनुरसी मधुहाजनश्च कोणेषु शंख उरुगाय उपर्युपेंद्रस्तार्क्ष्यः क्षितौ हलधरः
पुरुषः समंतात् २२

वाकुर्वत २१ अंघ्रिं अंघ्री जानवी जानु नी भुजं भुजौ कं शिरः २२ तथा दिक्षु रक्षामकुर्वन्नित्याह चक्र्य
ग्रत इति चक्रसहितो हरिस्तवाग्रतोऽस्तु सह गदया गदासहितो हरिस्तव पश्चादस्तु त्वत्पार्श्वयो
र्द्वे नरहरी मधुहा असिधरो जनश्च शंखं उरुगायः उपरि अग्रतः कोणेषु क्षितौ अथस्तात् २२

भा०द०
पू०
१२

एवंबहिःरक्षांकृत्वांतरंगामकुर्वन्नित्याह इंद्रियाणीति २४ आत्मानमहंकारं २५ २७ २८ संन्य
वेशयत्शाययामास ३० ३१ विस्मयमेवाह नूनमिति बतविस्मयेसांप्रतंसञ्जातऋषिस्तपःप्रभावा

द

इंद्रियाणिहृषीकेशःप्राणान्नारायणोवतु श्वेतद्वीपपतिश्चित्तंमनोयोगेश्वरोवतु २४
पृश्निगर्भस्तुतेबुद्धिमात्मानंभगवान्परः क्रीडंतंपातुगोविंदःशयानंपातुमाधवः २५
व्रजंतमव्याद्वैकुंठआसीनंत्वांश्रियःपतिः भुंजानंयज्ञभुक्पातुसर्वग्रहभयंकरः २६ डाकि
न्योयातुधान्यश्चकुष्मांडायेर्भकग्रहाः भूतप्रेतपिशाचाश्चयक्षरक्षोविनायकाः २७ को
टरारेवतीज्येष्ठापूतनामातृकादयः उन्मादायेह्यपस्मारादेहप्राणेंद्रियद्रुहः २८ स्वप्नदृ
ष्टामहोत्पातावृद्धाबालग्रहाश्चये सर्वेनश्यंतुतेविष्णोर्नामग्रहणभीरवः २९ इतिप्र
णयबद्धाभिर्गोपीभिःकृतरक्षणं पाययित्वास्तनंमातासंन्यवेशयदात्मजं ३० तावन्नं
दादयोगोपामथुरायाव्रजंगताः विलोक्यपूतनादेहंबभूवुरतिविस्मिताः ३१ नूनं
बतर्षिःसंजातोयोगेशोवासमाससः सएवदृष्टोह्युत्पातोयदाहानकदुंदुभिः ३२ क
लेवरंपरशुभिश्छित्वातत्तेव्रजौकसः दूरेक्षिप्त्वावयवशोन्यदहन्काष्ठवेष्टितं ३३ दह्य
मानस्यदेहस्यधूमश्चागुरुसौरभः उत्थितःकृष्णनिर्भुक्तसपद्याहतपाप्मनः ३४

तः योगेशःसन्नातीवासमभ्यगास यतोयतःसएवदृष्टइति ३२ ३३ विस्मयांतरमाह दह्यमान
स्येति कृष्णेननिर्भुक्तः अतएवसद्यआहतःपाप्मायस्य ३४

२०

प्रसंगान्तवैमन्यन्यायेनभक्तिवैभवमाह पूतनेति ३५ श्रद्धयाश्रात्विकंनाभक्त्याप्रेम्णा एकाहि
त्यास्तन्मातरऽतिवन्साह एणलीलाभिप्रायेणबहुवचनं योगोपिकास्तक्षमातरोभवन्निति ३६

पूतनालोकबालघ्नी राक्षसीरुधिराशना जिघांसयापिहरयेस्तनंदत्त्वापसद्गति ३५ किंपुनः
श्रद्धयाभक्त्याकृष्णायपरमात्मने यच्छन्प्रियतमंकिंनुरक्तास्तन्मातरोयथा ३६ पद्भ्यांभक्तहृ
दिस्थाभ्यांवंद्याभ्यांलोकवंदितैः अंगंयस्याःसमाक्रम्यभगवानपिबत्स्तनं ३७ यातुधान्या
पिसास्वर्गमवापजननीगतिं कृष्णभुक्तस्तनक्षीराःकिमुगावोनुमातरः ३८ पयांसियासाम
पिबत्पुत्रस्नेहस्नुतान्यलं भगवान्देवकीपुत्रःकैवल्याद्यखिलप्रदः ३९ तासामविरतंकृष्णे
कुर्वतीनांसुतेक्षणं नपुनःकल्पतेराजन्संसारोज्ञानसंभवः ४० कटधूमस्यसौरभ्यमवघ्रा
यव्रजौकसः किमिदंकुतएवेतिवदंतोव्रजमाययुः ४१ तेतत्रवर्णितंगोपैःपूतनागमना
दिकं श्रुत्वातन्निधनंस्वस्तिशिशोश्चासन्सुविस्मिताः ४२ नंदःस्वपुत्रमादायप्रेत्यागत
मुदारधीः मूर्ध्न्युपाघ्रायपरमांमुदंलेभेकुरूद्वह ४३ यएतत्पूतनामोक्षंकृष्णस्यार्भकमद्भु
तं शृणुयाच्छ्रद्धयामर्त्योगोविंदेलभतेरतिं ४४ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेपू
तनामोक्षोनामषष्ठोऽध्यायः॥६॥

४ एतत्पूतनामोक्षंआर्भकंअर्भकचरितंकिंतत्पूतनामोक्षमिति ४४ अतंदैत्यकुलःनीपाःपू
तनायाःशिशुघ्नत्वात् तन्यायोप्रानतःप्राणैःप्राणाञ्जतिमकल्पयत् ४५ ॥इतिदशमेषष्ठः॥६

भा॰द॰
पू॰
२८

उक्तिपन शाकटंत्रोस्मिन् तृणावर्तमथः स्तिपन दर्पायन विश्वमास्येचकृष्णः श्रीउनिसममे १ कु
लार्भकस्यथास्थिपुरुषेत्वादेनिमेः मयस्तदेवसंप्रश्नं राजान्यदपिनंदति येनयेनेति येनयेनम
त्स्याद्यवतारेणपीयानिपानिकर्माणिकरोतितानिनः कर्णसुखावहानिमनः प्रीतिकराणीतिच
भवन्त्येवतथापियत् शृण्वतः पुंसः पुरुषमात्रस्य अरतिर्मनोग्लानिः तन्मूलमभूतापिविपासा

रा॰ वाच येनयेनावतारेणभगवान्हरिरीश्वरः करोतिकर्णरम्याणिमनोज्ञानिचनः प
भो १ यच्छृण्वतोपैत्यरतिर्वितृष्णासत्वंचशुद्ध्यत्यचिरेणपुंसः भक्तिर्हरौतत्पुरुषेचसख्यं
तदेवहारंवदमन्यसेचेत् २ अथान्यदपिकृष्णस्यतोकाचरितमद्भुतं मानुषंलोकमासा
द्यतज्जातिमनुरुंधतः ३ श्रीशुकउवाच॥ कदाचिदौत्थानिककौतुकाप्लवेजन्मर्क्षयोगे
समवेतयोषितां वादित्रगीतद्विजमंत्रवाचकैश्चकारसूनोरभिषेचनंसती ४

वश्रपगच्छतितथासत्वशुद्धिर्हरौभक्तिर्हरिदासससख्यानिचभवंति तदेवहारंहरेश्रीतिमनोह
रंवा वदानुग्रहंयदिकरोषीति २ अन्यौत्सुक्येनपुनर्विज्ञापितम् अथेति अनुरुंधतोऽनुकुर्व
तः ३ उत्थानेशिशोरंगपरिवर्तनेनतत्रकरणीयेकौतुकाप्लवेउत्सवाभिषेके तथातस्मिन्ने
वदिनेजन्मर्क्षस्यापियोगेऽतिमहोत्सवेसमवेतयोषितोमिलितपुरस्त्रीणांमध्येवादित्रादिभिः

५ श्रीभागवतदशमस्कन्धे २८

अन्नादिभिः सुपूजितैर्विप्रैः कृतमंगले संजातनिद्रे अतिक्षीणीयसि ते अप्रीशायत शायितवती शाक
टस्याधस्तात्प्रियेत्वं ५ उदक्षिपत ऊर्ध्वं चालितवान् ६ ततः शयानस्य शिशोरल्पकस्यासौ प्रवाला-
वन्मृदुः अयो अंघ्रिस्तेन हतो शकटं व्यवर्तत विपरीतमपतत् कथं विध्वस्तानि नानारसवेतिकुंभभा

नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः अन्नाद्यवासःस्रगभीष्टधेनुभिः
संजातनिद्राक्षमशीशयच्छनैः ५ औत्थानिकौत्सुक्यमनामनस्विनी समागतान्पूजयती व्र
जौकसः नैवाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुदक्षिपत् ६ अधः शयानस्य
शिशोरनोल्पकप्रवालमृद्वंघ्रिहतं व्यवर्तत विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तचक्राक्ष
विभिन्नकूबरं ७ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः नंदा
दयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ८ इति ब्रुवतोति विवादमोहि
ताजनाः समेतान्परिवव्रुरर्भकाः ८ ऊचुरव्यवसितमतीन्गोपान्गोपीश्च बालकाः रुदतानेनपा
गोपीश्च बालकाः रुदतानेन पादेन क्षिप्तमेतन्न संशयः ९ ॥

तत्तानि स्वर्णरजतानिर्मितकांस्यादिमयानि यथा भवंति तथा चक्रे च अक्षश्च चक्राक्षाः व्यत्यस्ताश्च
चक्राक्षाः यस्मिन्विभिन्नाः कूबरो युगंधरो यस्य तत्तु यथा भवति तथा व्यवर्ततेति ७ अद्भुतदर्शनेनाकु
लाव्यग्राः तदेवाह कथमिति विपर्यगात् विपरीतमपतदिति ८ ९ ॥

भा·द
पू
४९

न ग्रहू पितरौ विप्रा अंगनजाग्राः उत अपि तामसस्यैतन्न संभवति एते च बालाः किं जानन्तीति ९ इत्यो
क्तैः सूक्तैः कृता ११ भगवत्प्रभावानभिज्ञविप्रचेष्टितं विदुर्वयं त्वाह पूर्ववदित्या दिना वलिभिः श
कैः यद्वा अष्टदिनवलिभिः सहितं सपरिकरं यथापूर्वं स्थापितं विप्राः दध्यादिभिरर्चयामासुः

न ते अगृहं पितरौ गोपबालभाषितमित्युत अप्रमेयं बलं तस्य बालकस्य न ते विदुः ९ इदं ते
सनमादाय यशोदाग्रहे शोकिता कृतस्वस्त्ययने विप्रैः सजो स्तनमपाययत ११ पूर्वव
त्स्थापितं गोपैर्बलिभिः सपरिच्छदं विप्राहुत्वार्चयांचक्रुः दध्यक्षतकुशाम्बुभिः १२ ये स
यानृतदंभेर्ष्याहिंसामानविवर्जिताः न तेषां सत्यशीलानामाशिषो विफलाः कृताः
१३ इति बालकमादाय सामर्ग्यजुरुपाकृतैः जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः
१४ वाचयित्वा स्वस्त्ययनं नंदगोपः समाहितः हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागु
णं १५ गावः सर्वगुणोपेता वासः स्रक्रुक्ममालिनीः आत्मजाभ्युदयार्थाय प्रादात्ते चा
न्वयुंजत १६ विप्रा मंत्रविदो युक्तास्तैर्याः प्रोक्तास्तथाशिषः ता निष्फला भविष्यंति न

कृत्वा ग्रहादिहोमं विधाय १२ असत्यासूयादोषविकरणे ईर्ष्याग्रलानि तेषामाशिषः कृ
तास्तैः प्रयुक्ताः १३ इति एवमभिप्रेत्य सामर्ग्यजुर्भिरुपाकृतैः संस्कृतैः पवित्राश्चौषधयो येषु
जलेषु तैः कृत्वा द्विजोत्तमैः कर्तृभिरभिषिच्य अभिषेकं कारयित्वा १४ हुत्वा ह्रावयित्वा १४

इत्थंमत्तपादेनशाकटंभोत्रिलीलया तृणावर्त्तंपराभीसम्भ्यपानयदर्भकः श्रोतेहमन्तंगो
तृणावर्त्तात्समत्युपरिहारायकृतेनैवात्मनउत्संगादुत्तारयितुंकृतभारमजानती १८ उत्थानश्रो
कयामहापुरुषमादध्यौश्रीकृष्णोदरवर्त्तिनोजगतोभारेणपीडिताविस्मिता यशोदाजगतोमध्येकर्म

एकदारोहमारूढंलालयंतीसुतंसती गरिमाणंशिशोर्वोढुंनसेहेगिरिकूटवत् १८ भूमौ
निधायतंगोपीविस्मिताभारपीडिता महापुरुषमादध्यौजगतामासकर्मसु १९ दैत्योनाम्ना
तृणावर्त्तः कंसभृत्यःप्रणोदितः चक्रवातस्वरूपेणजहारासीनमर्भकं २० गोकुलंसर्वमावृ
ण्वन्मुष्णंश्चक्षूंषिरेणुभिः ईरयन्सुमहाघोरशब्देनप्रदिशोदिशः २१ मुहूर्त्तमभवद्गोष्ठं र
जसातमसावृतं सुतंयशोदानापश्यत्तस्मिन्न्यस्तवतीयतः २२ नापश्यत्कश्चनात्मानंपरंचा
पिविमोहितः तृणावर्त्तनिसृष्टाभिःशर्कराभिरुपद्रुतः २३ इतिखरपवनचक्रेपांसुवर्षेसु
तपदवीमबलाविलक्ष्यमाता अतिकरुणमनुस्मरंत्यशोचद्भुविपतितामृतवत्सका
यथागौः २४ रुदितमनुनिशम्यतत्रगोप्योभृशमनुतप्तधियोश्रुपूर्णमुख्यः रुरुदुरनुप
लभ्यनंदसूनुंपवनउपारतपांसुवर्षवेगे २५

सुआसबभूव ततजगदुद्भवंतंवेदेत्यर्थः १९ २० ईरयन्निनादयन्नित्यर्थः २१ यतः यत्रन्यस्तवती
तस्मिन्स्थानेनापश्यत् २२ २३ खरपवनचक्रात्पांसुवर्षेसति २४ उपारतःपांसुवर्षस्यवेगो
यस्मिन्तथाभूतेपवनेसति तत्रतस्यारुदितमनुनिशम्यगोप्योरुरुदुः २५ ॥

भा॰द॰
पू॰
३

वात्याचक्रवातः तद्रूपधरः कृष्णंहरन् शांतरयः कथंचिन्नभोगतः ततः परं गंतुं नाशक्नोदित्यर्थः
२६ गुरुमत्तयातिगौरवेण तेन यात्रा अश्मानं अश्मवंतं पर्वतप्रायं मन्यमानस्तेनैव आत्मनो गलेगृ
हीतत्वात् तं त्यक्तुमिच्छन्नपि नाशक्नोदित्यर्थः तस्योरसि लंबमानं कृष्णमादाय मात्रे प्रतिहृत्य स

तृणावर्तः शांतरयो वात्यारूपधरो हरन् कृष्णं नभोगतो गंतुं नाशक्नोद्भूरिभारभृत् २६ तमश्मानं मन्यमान आत्मनो गुरुमत्तया गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकं २७ गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः अव्यक्तरावो न्यपतत्सहबालो व्यसुर्व्रजे २८ तमंतरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालं पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदत्यो ददृशुः समेताः २९ प्रादाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि लंबमानं तं स्वस्तिमंतं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तं गोप्यश्च गोपाः किल नंदमुख्या लब्ध्वा पुनः प्रापुरतीव मोदं ३० अहो बतात्यद्भुतमेष रक्षसा बालो निवृत्तिं गमितोऽभ्यगात्पुनः हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद्विमुच्यते ३१

मर्प्य विस्मिताश्चर्यवंतो बभूवुरिति विहायसा गगनमार्गेण पुरुषादेन नीतेन तथापि मृत्युमुखात्प्रमु
क्तं पुनर्लब्ध्वा मोदं प्रापुरिति ३० परस्परं हर्षकथामाह अहो बतेति निवृत्तिं गमितो मृत्युं प्रापितः
कोऽत्रातिविस्मयो यज्जन्यतेनएवैनं दिनेनिने एव केचिदाहुः हिंस्र इति ३१ ३०

नः अस्माभिस्तीर्णं कृतं पूर्तं वापीकूपतडागादिनिर्माणमिष्टं यज्ञयत्ताग्निहोत्रादि दत्तं दानं यत्
यस्मात्सम्परेतादेः प्रणयन्हर्षयन् ३३ ३४ ३५ स्तनावर्तिगमेरुष्टगौरवाशंकनीमुखं वोधयन्

किंनस्तपश्चीर्णमधोक्षजार्चनं पूर्तेष्टदत्तमुतभूतसौहृदं यत्संपरेतः पुनरेव बालको
दिष्ट्या स्वबंधून्प्रणयन्नुपस्थितः ३२ दृष्ट्वाद्भुतानि बहुशो नंदगोपो बृहद्वने वसुदे
ववचो भूयो मानयामास विस्मितः ३४ एकदार्भकमादाय स्वांकमारोप्य भामिनी प्र
स्नुतं पाययामास स्तनं स्नेहपरिप्लुता ३५ पीतप्रायस्य जननी सुतस्य रुचिरस्मितं मुखं लाल
यती राजन् जृंभतो ददृशे इदं ३६ खं रोदसी ज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च
द्वीपान्नगांस्तद्दुहितॄर्वनानि भूतानि यानि स्थिरजंगमानि ३७ सा वीक्ष्य विश्वं सहसा
राजन्संजातवेपथुः संमील्य मृगशावाक्षी नेत्रे आसीत्सुविस्मिता ३८ इति श्रीभागव
तेमहापुराणे दशमस्कंधे सप्तमोध्यायः ७ ॥

दर्शयामास जृंभमाणो भुवि जगत् ३६ पीतप्रायस्य पीतप्रायः स्तनो येन तस्य ३६ नगान्गि
रीन् तद्दुहितॄर्नदीः ३७ ३८ इति भावार्थदीपिकायां दशमस्कंधे सप्तमोध्यायः ७ ॥

श्री॰ भा॰ द॰ सू॰ टी॰ ३१

अष्टमेनामकर्मास्यबालक्रीडाकुतूहले मृद्भक्षणाभियोगेचविश्वरूपंनिरूप्यते १ विश्वरूपादि बालस्यनिशम्याशङ्किनःपितुः नामकृद्गर्गवाक्येननिर्जितत्वमसूसुचत् १ २ ३ पूर्णस्यकथं मुनिनोगृहमागतः तत्राह महद्विचलनमिति महतांस्वाश्रयादन्यत्रविचलनेनस्वार्थं किंतु गृहि णामंगलाय नत्र तर्हितत्पूर्णमहर्षेणार्थंकिमितिनगच्छति तत्राह दीनचेतसांकृपणानां लगाम पितृहेत्यक्रमशक्तवतामित्यर्थः ४ त्वयाबालयोर्नामकरणादिकरणीयमितिवक्तुंतस्यज्ञाना

श्रीशुकउवाच गर्गःपुरोहितोराजन्यदूनांसुमहातपाः व्रजंजगामनंदस्यवसुदेवप्रचो दितः १ तंदृष्ट्वापरमप्रीतःप्रत्युत्थायकृतांजलिः आनर्चाधोक्षजधियाप्रणिपातपुरःस रम् २ सूपविष्टंकृतातिथ्यंगिरासूनृतयामुनिम् नंदयित्वाब्रवीद्ब्रह्मन्पूर्णस्यकरवाम किम् ३ महद्विचलनंनृणांगृहिणांदीनचेतसाम् निःश्रेयसायभगवन्कल्पतेनान्यथा क्वचि ४ ज्योतिषामयनंसाक्षाद्यत्तज्ज्ञानमतींद्रियं प्रणीतंभवतायेनपुमान्वेदपरावरं ५

तिशयमाह ज्योतिषामयनमिति पदंतींद्रियज्ञानसाधनंज्योतिषामयनं तत्प्रतिपादकंज्यो तिःशास्त्रमित्यर्थः तस्मात्त्वद्भगवताप्रणीतंयेनान्योपिपुमान्परावरंपरंकारणं पूर्वजन्मसुकृत कर्म्म अवरंकार्यं अस्मिन्जन्मनिभाविफलंतद्वेद अतश्चजातके यदुपचितमन्यजन्मनिशुभा शुभंतस्यकर्मणःप्राप्तिं दर्शयतिशास्त्रमेतन्नमसिद्धंयावणादीपरवेति ५ ॥ ३१

विवदितनमाह त्वंहीति देवज्ञोमंत्रविच्च त्वं अतोनामकरणादिसंस्कारान्कर्तुमर्हसीत्यर्थः
नन्वेतद्गुरूणांकरणीयं तत्राह त्वणामिति ६ अस्त्वेतत्साद्दिनेनेदंप्रतिगृह्नमेतत्कार्यमित्यभि
प्रायेणप्रत्याचक्षाणइवाह यदूनामिति भवत्वेतत्तथापित्वमज्ञातानइतिकोविद्यादितिचेदतआ
ह ख्यातश्चेति ततःकिमतआह सुतमिति कंसोमन्यतेकल्पयेदित्यर्थः ७ नन्वयदुकुमारा इ
तिकथंविज्ञानात् तत्रैवसुदेवस्यपुत्रस्तत्रापिदेवक्याजातइति कुतोजानीयात् तत्राह पाप

त्वंहिब्रह्मविदांश्रेष्ठःसंस्कारान्कर्तुमर्हसि बालयोरनयोर्नृणांजन्मनाब्राह्मणोगुरुः ६
गर्गउवाच यदूनामहमाचार्यःख्यातश्चभुविसर्वदा सुतंमयासंस्कृतंतेमन्यतेदेवकी
सुतं ७ कंसःपापमतिःसख्यंतववानकदुंदुभेः देवक्याअष्टमोगर्भोनस्त्रीभवितुमर्हति
८ इतिसंचिंतयन्श्रुत्वादेवकीदारिकावचः अपिहंतागताशंकस्तर्हि
तन्नोऽनयोभवेत् ९ रामायनमः

मतिरित्यादि ८ किंमयाहूतयामंदेत्यादि देवकीकन्यकावचःश्रुत्वादेवक्याअष्टमोगर्भो
नस्त्रीभवितुमर्हतीतिचानित्यंसंचिंतयन् सामान्येनक्वचिदस्तीतिज्ञात्वा एवंशास्मत्सख्यंचिंत
यन् त्वत्कृतेभवेदितिसंभाव्यमत्संस्कारलिंगेनचआगताशंकः आगताआशंकायस्य अपि
यदिहंताहंनिष्यतितर्हितत्तदानोमहाननयःस्यादिति ९ ॥

श्री॰
भा॰ द॰
पू॰ टी॰
३२

द्विजातिसंस्कारंद्विजातीनामावश्यंकर्त्तव्यंसंस्कारमात्रंकेवलेस्वस्तिवाचनपूर्वकंकुर्विति १०
११ यदूनामपृथग्भावात्कुविद्वेतोर्विश्रुतिस्यद्यमानानांयदूनामपृथग्भावाद्भावोभावनंतस्मात् अ
मोन्याशितत्वासर्वैकमन्यकरणादित्यर्थः सम्यक्कर्षति एकीकरोतिसंकर्षणमप्युशंतिमन्यंति
वदंतीत्यर्थः गर्भसंकर्षणात्तनप्रकाशयति १४ अस्यतवपुत्रस्यअतःश्रीकृष्णस्येकेना

नंदउवाच अलक्षितोस्मिन्रहसिमामकैरपिगोव्रजे कुरुद्विजातिसंस्कारंस्वस्ति
वाचनपूर्वकम् १० श्रीशुकउवाच एवंसंप्रार्थितोविप्रःस्वचिकीर्षितमेवत।
त् चकारनामकरणंगूढोरहसिबालयोः ११ अयंहिरोहिणीपुत्रोरमयन्सुहृ
दोगुणैः आख्यास्यतेरामइतिबलाधिक्याद्बलंविदुः यदूनामपृथग्भावात्संकर्ष
णमुशंत्युत १४ आसन्वर्णास्त्रयोह्यस्यगृह्णतोनुयुगंतनूः शुक्लोरक्तस्तथापी
तइदानींकृष्णतांगतः १५ प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः वासुदेवइ
तिश्रीमानभिज्ञाःसंप्रचक्षते १६ ॥ रामाय

नामभविष्यति १४ प्रागयमिति सामान्योक्त्याऋषिरयंजन्मांतरगतंनामकथयनीति नं ३२
दोमन्यतेस्म अतएववासुदेवइति संप्रचक्षतइति १६ ॥ रामायनमः
रामायनमः ॥

गुणानुरूपाणीश्वरः सर्वज्ञ इत्यादीनि कर्मानुरूपाणि गोवर्द्धनोद्धरण इत्यादीनि तानि सर्वाण्य
हमपि न वेद जनाश्चापि नो विदुः १७ जातकफलमाह एषइति अथास्यत आधास्यति १८ अने
न रक्ष्यमाणाः समेधिताश्च दस्यून्जिग्युरिति १९ २० २१ इतिच आत्मानं प्रतिसमादिश्य आत्मा

बहूनि संति नामानि रूपाणि च सुतस्य ते गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः १७ एष
वः श्रेय आधास्यद्गोपगोकुलनंदनः अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ १८ पुरानेन
व्रजपते साधवो दस्युपीडिताः अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः १९ य एतस्मिन्म
हाभागाः प्रीतिं कुर्वंति मानवाः नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः २० तस्मान्नं
दात्मजोयं ते नारायणसमो गुणैः श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः २१
इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते नंदः प्रमुदितो मेने आत्मानं पूर्ण
माशिषां २२ कालेन व्रजताल्पेन गोकुले रामके
शवौ जानुभ्यां सह पाणिभ्यां रिंगमाणौ वि
जह्रतुः २३ रामायनमः

नंदः स्वेवा आशिषां आशीर्भिः २२ बालक्रीडाचमत्कारैः कृष्णो रामेण संयुतः परमानंदमाधत्त
न व्रजे नंदयशोदयोः सुखित्वमेव दर्शयन्नाह कालेनेति २३ ॥ ॥

श्री॰
भा॰ द॰
स्कं॰ टी॰
३३

अत्र कृष्णस्तु नः पुनरा कृष्णस्य सरीसृपंतौ अतिशयेन चलंतौ कथं घोषाः कटिपादभूषणानि किंकिणयस्तेषां
प्रघोषणानादेन रुचिरं यथा तथा तेषां घोषाणां नादेन हृष्टमनौ पश्चात्लोकं ततनस्ततो गच्छंतं जनं अनुस
त्यविचत्ततारणिपदानि अत्रगम्य मुग्ध्यवत्भीतवत् मात्रारंतिसमीपं उपयतुः जग्मतुः २४ तदा च तन्मा
तरौ निजस्तौ दोर्भ्यां उपगृह्य प्रमीदं पपतुः कथंभूते घृणया कृपया स्नुवंत्यौ पयः स्तनाः याभ्यां स्तयो
पंकेनांगरागेण रुचिरौ कथंभूतं सुखनिरीक्ष्य मुग्धं स्मितं यस्मिन् अल्पादर्शनात्यस्मिन् तच्चत

तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु तन्नादहृष्टमनसावनुसृत्य
लोकं मुग्धप्रभीतवदुपेयतुरंतिमात्रोः २२ तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरा
गरुचिरावुपगृह्य दोर्भ्यां दत्वा स्तनं प्रपिवतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्पदशनं ययतुः
प्रमोदम् २३ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः वत्सैरित
स्ततउभावपि कृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः २४ शृंग्यग्निदंष्ट्र्यसिजलद्विज
कंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं गृह्याणि कर्तुमपि यत्र न तज्जनन्यो शेकात आप
॥तरलं मनसोनवस्था २५
त्व २५ यर्ह्यंगनादर्शनीयाः कुमारलीलाययोः तथाभूतौ जातौ
तदा अतःवं व्रजे व्रजस्य मध्ये तदबलाः व्रजांगनाः तौ प्रेक्षंत्यः प्रेक्षमाणाः विस्मृतगृहकृत्याः हसंत्यो ज
हृषुः कथंभूतौ ताभ्यां गृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततो कृष्यमाणौ २६ अतिचपलौ शृंग्या
दिभ्यो निषेद्धुं रक्षितुं तानि कर्माणि च कर्तुं यत्र यदा तज्जनन्यो नशेकात तदालं मनसोनवस्था

सायदृतिनित्यहृस्मोप्युपरागकायर्शीतला २९ ॥
३३

२८ ३० कृष्णस्य चापल्यचौर्यादीनि सहैवाखिलसमतः प्रजल्पंत्यः समागत्य गोप्यो गोप्येभ्यः सुदंदडुः असमये यदो
ह्यकाले क्रोशे संजातहासः स्तेयं चौर्येणार्जितेनं तदनंतरं वापि स्वादु नेतरं नः दधि च पयश्च दधिपयः अत्ति किं
च भोक्ष्यन्मर्कटान्विभज्य ददाति तेषां मध्ये स मर्कटेन कोपि नात्ति चेत्तर्हि भांडं भिनत्ति क्वचिद्द्रव्यस्य अलाभे
तिसः गृहान्यस्यामीस्वेवकुपितो याति यद्वा सगृहकुद्रदिस्तभ्यः कुपितस्तेषां तोकानपत्यानिकदिषु स्वमातु

कालेनाल्पेन राजर्षे रामकृष्णश्च गोकुले अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा २८ ततस्तु भग
वान्कृष्णो वयस्यैर्व्रजबालकैः सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं २९ कृष्णस्य गोप्यो रुचि
रं वीक्ष्य कौमारचापलं शृण्वंत्याः किल तन्मातुरिति होचुः समागताः ३० वत्सान्मुंचन्क्वचिदस
मये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्यथ दधिपयः कल्पितैः स्तेययोगैः मर्कान्भोक्ष्यन्विभजति स चेन्ना
त्ति भांडं भिनत्ति द्रव्यालाभे सगृहकुपितो यात्युपक्रोश्य तोकान् । हस्ताग्राह्ये रचयति विधिं पीठ
कोलूखलाद्यैश्छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित् ध्वांतागारे धृतमणिगणं स्वांगम
र्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ३१ एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वा
स्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्या
तार्था प्रहसितमुखी न ह्युपालब्धुमै

पक्रोश्य रोदयित्वा याति इति ३१ कल्पितैः स्तेययोगैरित्युक्तं प्रपंचयति हस्ताग्राह्य इति तं गोपिकास्थभांडे
षु यंतर्हितं तदप्यात्तो वयुनं ज्ञानं यस्य सः छिद्रं रचयति तद्वित् छिद्ररचनादिवित् ध्वांत एके गृहे स्वांगमेवा
र्थप्रदीपं विरचयति विशेषतोष्टतमणीनां गणो यर्हि यस्मिन्काले ते चौरोयमाक्रुष्टः सन् जल्पति त्वमेव चोरोस्य
द्गृहस्वामीत्यादीनि ३२ धार्ष्ट्यानि प्रागल्भ्यानि उशतीरुशतिभिः कमनीये यशोदे यद्वा उशति वास्तो

स्वर्चिते गृहे मेहनादीनि मूत्रपुरीषोत्सर्गादीनि कुरुते एवं स्तेयोपायैर्विरचिता कृतिः कर्म येन सः तत्समीपे सुप्रतीकः साधुरिवास्ते सभयेन नयने यस्मिन् तच्च तत् श्रीमुखं च तेन

दालोकिनीभिर्व्याख्यातार्था प्रकोपितनन्मकला उपालब्धुं शक्ता नैच्छत्

कृष्ण ३३ ॥

श्री.
भा.द.
स्.टी.
३४

कदाचिदपराधांतरेउपालभततदानमहदाश्चर्यमभूदितिकथयन्नाह उपालभ्यनिर्भर्त्स्य भये
नसंभ्रांतप्रेक्षणेचपलनिरीक्षणेअक्षिणीयस्यास्तम् ३५ अदांतात्मन् चपलगात्र रहःएकांते ३६ नाहं
भक्षितवानिति नहिवाधकिंविस्मयाभवंत मत्कृत्वावादादेवसर्वमस्तीतिभावः समक्षंप्रत्यक्षं ३
३७ व्यादेहिमुखंप्रसारयेतिव्यादत्तप्रसारितवान् ३८ तत्रतस्मिन्मुखेविश्वंददृशेददर्श तत्प्रपंच

एकदाक्रीडमानास्तेरामाद्यागोपदारकाः कृष्णोमृदंभक्षितवानितिमात्रेन्यवेदयन् ३४
सागृहीत्वाकरेकृष्णमुपालभ्यहितैषिणी यशोदाभयसंभ्रांतप्रेक्षणाक्षमभाषत ३५
कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः वदंतितावकाह्येतेकुमारास्तेग्रजोप्ययं ३६
नाहंभक्षितवानंवसर्वेमिथ्याभिशंसिनः यदिसत्यगिरस्तर्हिसमक्षंपश्यमेमुखं ३७ य
द्येवंतर्हिव्यादेहीत्युक्तःसभगवान्हरिः व्यादत्ताव्याहतैश्वर्यःक्रीडामनुजबालकः ३८
सातत्रददृशेविश्वंजगत्स्थास्नुचखंदिशः साद्रिद्वीपाब्धिभूगोलंसवाय्वग्नींदुतारकं ३९ ज्यो
तिश्चक्रंजलंतेजोनभस्वान्वियदेवच वैकारिकाणींद्रियाणिमनोमात्रागुणास्त्रयः ४० ॥

यति जगतजंगमं स्थास्नुस्थावरं खंअंतरिक्षलोकं साद्रिद्वीपाब्धिभूगोलंपर्वतद्वीपसमुद्रसहितं
भूगोलंभूर्लोकंवायुःप्रवाहः अग्निर्वैद्युतः इंदुश्चतारकाश्चतत्सहितं ३९ ज्योतिश्चक्रंस्वर्गलोकं वै
कारिकानिदेवाः मनश्रुतिवैकारिकशब्देनगृहीतमपिदेववैलक्षण्यात्पुनरुक्तं इंद्रियाणांचतेजसानि

मनः तामसः पञ्चदशः ॥ ३४

एवमेतद्विचित्रं विश्वं सहैव कं देवमीत्य शंकामवापेत्यन्वयः विचित्रतामाह जीवश्चगणनोभकः का
लश्च परिणामहेतुः स्वभावश्च जन्महेतुः कर्म च तत्संस्कारश्चाशयश्च एतैर्लिंगानां चराचरशरीराणां भेदो
यस्मिन् तत् तत्र व्रजं च सहात्मानं स्वसहितं कृत्स्नं विद्यीत्य सूनोस्तनो अल्पे विदारितेस्ये शंकामवाप ध। ता
माह किं स्वप्न इति यदि तं विलोकयामि नायं स्वप्नस्तर्हि किं देवस्य हरेर्माया तत्राह न चेत् अन्ये किं न पश्यन्ति तर्हि किं
वा मदीय एव कश्चिद्बुद्धिमोहो विपर्यासः दर्पणाद्यत्रैव तत् एवं तर्हि अयं ममार्भकस्यापि कथमेतन्न प्रतीयते अत एवेह

एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदं सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहा
त्मानमवाप शंकाम् ध२ किं स्वप्न एतदुत देवमाया किंवा मदीयो बत बुद्धिमोहः अथो अमुष्यैव
ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोगः ध२ अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचो
भिरंजसा यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्पदं धर ॥

अर्भकरूपेण चकल्पं जगत्प्रतीयते न यथा सति विंबप्रतिविंबयोरिव परस्परं वैपरीत्येन प्रतीतिः स्यादित्याश
ंक्यान्यथा वितर्कयति अथवा अमुष्य अर्भकस्यापि सतो यः कश्चनाचिन्त्य आत्मयोगः सो यमैश्वर्यमौ
त्पत्तिकः स्वाभाविकः ध२ चरमपक्षमाश्रित्यायमीश्वर इति निश्चित्याह अथो इति चेतः चित्तादिभिर्वि
तर्कगोचरं जगत् न यदाश्रयं यदधिष्ठानं येन करणाधिष्ठात्रा यतो बुद्ध्यादिहेतुभिर्व्यक्तात् तत्तदिदमविना
शं भवत्तत्तत्पदं कीदृक् अतएवाह सुदुर्भाव्यमिदमेव तत्तम विज्ञामित्यर्थः ध२ ॥

श्री॰
भा॰द॰
सू॰टी॰
३५

एवंप्रपंचप्रतीत्योत्तीर्णंतत्त्वंपुनर्जीवसंसृतिहेतुमायाश्रयतेनोन्वयंत्याह अहमिति यशोदानामाहं अ
सौममपतिः अमुष्यव्रजेश्वरस्याखिलवित्तापिरूपाश्री अहमतोजायापव हस्तीमेसुतः गोष्पादयस्त्वमदी
याइत्येवंकुमतिर्यन्मायया सएव मे शरणमिति ४४ वैष्णवींस्वीयां ४५ प्रवृद्धेनस्नेहेनकलिलंव्याप्तंहृदयंय
स्याःसापूर्ववासीत् ४६ मायावलोद्रेकमाह त्रय्येति त्रय्याकर्मादिरूपया उपनिषद्भिर्ब्रह्मेति सांख्यैःपुरुष

अहंममासौपतिरेषमेसुतोव्रजेश्वरस्याखिलवित्तपासती गोप्यश्चगोपाःसहगोधनाश्चयन्माययेत्थंकुमतिःसमेगतिः ४४ इत्थंविदिततत्त्वायांगोपिकायांसईश्वरः वैष्णवींव्यतनोन्मायांपुत्रस्नेहमयींविभुः ४५ सद्योनष्टस्मृतिर्गोपीसारोप्यारोहमात्मजं प्रवृद्धस्नेहकलिलहृदयासीद्यथापुरा ४६ त्रय्याचोपनिषद्भिश्चसांख्ययोगैश्चसात्वतैः उपगीयमानमाहात्म्यंहरिंसामन्यतात्मजं ४७ राजोवाच नंदःकिमकरोद्ब्रह्मन्श्रेयएवंमहोदयं यशोदाचमहाभागापपौयस्याःस्तनंहरिः ४८ पितरौनान्वविंदेतांकृष्णोदारार्भकेहितं गायंत्यद्यापिकवयोयल्लोकशमलापहं ४९ श्रीशुकउवाच द्रोणोवसूनांप्रवरोधरयाभार्ययासह करिष्यमाणआदेशान्ब्रह्मणस्तमुवाचह ५० ॥ रामाय

इतियोगैःपरमात्मेति सात्वतैर्भगवानिति उपगीयमानंमाहात्म्यंयस्यतं ४७ अतिविस्मयेनपृच्छति
नंदइति महोदयंमहानुदयउद्भवोयस्मात् ४८ ययोःप्रपन्नोऽवतीर्णस्तौपितरावपियन्नान्वविंदतां
नप्राप्नुतांकृष्णस्योदारमहत् अर्भकेहितंबाललीलांयच्चकवयोगायंति नयोर्विदत्सुकिंश्रेयो

कौतुकि ४९ मनमांदारणम गोपालीलवणम ५० ॥
३५

५१ सएवेदह्रोणोजज्ञेसवनंदइत्यत्राख्यातः साचधरायशोदाअभवत् ५२ गोपागोपीनामपिवस्तस्व
भावादस्यैवभक्तिस्तयोःपुनर्नितरामिति ५३ स्वलीलयापुत्रभावानुकारिण्या ५४ इतिदशमेऽष्टमः
नवमेपयस्मिन्निकेगत्वागोप्यथनत्स्तान विलोक्यभांडभंगादिहस्तंदाम्नाववंधयत् १ तन्नूदतान्निर्नेविश्व

द्रोणउवाच जातयोर्नौमहादेवेभुविदेवेश्वरेहरौ भक्तिःस्यात्परमालोकेययांजोदुर्गतिंतरेत् ५१
अस्त्वित्युक्तःसभगवान्त्व्रजेद्रोणोमहायशाः जज्ञेनंदइतिख्यातोयशोदासाधराभवत् ५२ ततो
भक्तिर्भगवतिपुत्रीभूतेजनार्दने दंपत्योर्नितरामासीद्गोपगोपीषुभारत ५३ कृष्णोब्रह्मणआदे
शंसत्यंकर्तुंव्रजेविभुः सहरामोवसंश्चक्रेतेषांप्रीतिंस्वलीलया ५४ इतिश्रीभागवतेदशमेऽष्ट
मोध्यायः ८ श्रीशुकउवाच एकदागृहदासीषुयशोदानंदगेहिनी कर्मांतरनियुक्तासुनिर्म
मंथस्वयंदधि १ यानियानीहगीतानितद्बालचरितानिच दधिनिर्मंथनेकालेस्मरंतीतान्यगा
गायत् २ क्षौमंवासःपृथुकटितटेबिभ्रतीसूत्रनद्धंपुत्रस्नेहस्नुतकुचयुगंजातकंपंचसुभ्रूः ३
रज्ज्वाकर्षश्रमभुजचलत्कंकणौकुंडलेचस्विन्नंवक्त्रंकबरविगलन्मालतीनिर्ममंथ ३ तांस्त
न्यकामआसाद्यमथ्नंतींजननींहरिः गृहीत्वादधिमंथानंन्यषेधत्प्रीतिमावहन् ४ तमंकमारू
ढमपाययत्स्तनंस्नेहस्नुतंसस्मितमीक्षतीमुखं अतृप्तमुत्सृज्यजवेनसाययावुत्सिच्यमानेपयसि

दृष्ट्वाविस्मितचेतसः वेधनंहंत्यगलाद्यम्न्योर्गोपीनामन्वदर्शयत् २ स्वयंदधिनिर्ममंथ नदावागायते
तिचकारान्वयः १२ सुत्रनद्धंकांचीवद्धंजोराकर्षणश्रमोयययोर्भुजयोः चलंतौचकंकणौचकवरा

सितयधिश्रिते ५॥

द्विगलंसोमालसोयसः स्वा १ अधिश्रिते दुग्ध्यामारोपितेउत्सिञ्चमाने प्रति
तापेनोद्विच्यमाने ५ ॥

श्री॰ भा॰ द॰ सु॰ टी॰ ३९

दृषदश्मना शिलापुत्रेण अंतरं गृहमध्यं गतः पक्वान्तेन नवनीतमभक्षयत् ६ सुसृतं सुतप्तं दधिमं
मथनस्थानं प्रविश्य भिन्नं संदृश्य दृष्ट्वा ७ उलूखलाङ्घ्रेः परिवर्तितस्योलूखलस्योपरि शिचि शिक्ये
चौर्येण विशंकितं चंचलमीक्षणं यस्य तं ८ तपसा एकाग्रेण ईरितं तदाकारेणानीतं अत एव तन्मयं योग्यं
प्रवेष्टुं योगिनां मनो यं नाप्नोति अथवा अन्वधावत् न केवलं तत्ताप यत्तो योगिनांपि यं प्रवेष्टुं न क्षममिति

समातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंथभाजनं भित्त्वा मृषाश्रुर्दृषदश्मना रहो ज
घास हैयंगवमंतरंगतः ६ उत्तार्य गोपी सुशृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकं विलो
क्य भग्नं स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ७ उलूखलाङ्घ्रेरुपरि व्यवस्थितं मर्का
य कामं ददतं शिचि स्थितं हैयंगवं चौर्यविशंकितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छनैः ८
तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोवरुह्यापससार भीतवत् गोप्यन्वधावन्न यमाप योगिनां क्ष
मं प्रवेष्टुं तपसेरितं मनः ९ अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा
जवेन विस्रंसितकेशबंधनच्युतप्रसूनानुगतिः परामृशत् १० ॥

अन्वंचमाना अनुगच्छंती बृहत्योः श्रोण्योर्भरेण भारेण आक्रांता मंदीभूता गतिर्यस्याः सा वि
स्रंसितात्केशबंधात् च्युतैः प्रसूनैरनुगतिरनुगमनं यस्याः सा यद्वा जवेन कंपितात्केशबंधात्स्रस्तैः ३९
पतितानि प्रसूनानि अनुपश्चात् गतिर्यस्याः सा परामृशत् धृतवती १० ॥ ॥

अंजन्मषिणीअंजनतीमर्वतःप्रसृतंनीमषीययोः तेअक्षिणीस्वपाणिनाकषंतंसंमर्दयंतंभिषयंती
ह्रस्वःछांदसःभीषयंतीभयमुत्पादयंती अवागुरत् अभर्त्सयत ११ इयेषऐच्छत अतद्वीर्यकोविदा
तत्प्रभावानभिज्ञा १२ अकोविदत्वमेवाह नचांतरितिपंचभिः बंधनंहिबहिःपरिवृतेनदाम्नांतरा
वृतस्यभवति तथापूर्वापरविभागवतोवस्तुन पूर्वेनादाम्नसत्त्वापरेतः परिवेष्टनेनभवति नचैतन्

कृतागसंतंप्ररुदंतमक्षिणीकषंतमंजन्मषिणीस्वपाणिना उद्वीक्षमाणंभयविह्व
लेक्षणंहस्तेगृहीत्वाभिषयंत्यवागुरत् ११ त्यक्त्वायष्टिंसुतंभीतंविज्ञायार्भकवत्स
ला इयेषकिलतंबद्धुंदाम्नातद्वीर्यकोविदा १२ नचांतर्नबहिर्यस्यनपूर्वंनापिचा
परं पूर्वापरंबहिश्चांतर्जगतोयोजगच्चयः १३ तंमत्वात्मजमव्यक्तंमर्त्यलिंगम
धोक्षजं गोपिकोलूखलेदाम्नाबबंधप्राकृतंयथा १४ तद्दामबध्यमानस्यस्वार्भ
कस्यकृतागसः द्व्यंगुलोनमभूत्तेनसंदधेन्यच्चगोपिका १५ यदासीत्तदपिन्यूनं
तेनान्यदपिसंदधे तदपिद्व्यंगुलंन्यूनंयद्यदादत्तबंधनं १६ ॥ रामायनमः

दस्तीत्याह नचांतरिति किंचव्यापकेद्रव्येव्याप्यस्यबंधोभवति नतुविपरीतमित्याह पूर्वापर
मिति किंच तद्व्यतिरिक्तस्यचाभावान्नबंधइत्याह जगच्चयइति १३ तंमर्त्यलिंगमधोक्षजं आ
त्मजंमत्वाबबंधेति १४ द्व्यंगुलोनंद्वाभ्यामंगुलीभ्यामपूर्णम् १५ १६ ॥

श्री·
भा·द·
पू·टी·
१२

स्मितं कुर्वतीनां मध्ये स्वयमपि हसंती विस्मयमाप १७ १८ नचैवं स्यात्तत्राभंगइत्याह एवं संदर्शि
तेति सेश्वरमिदं विश्वं यस्य वशे यदधीनमित्यर्थः १९ भगवत्प्रसादमस्याः पि अलब्धकालभंते इदं न
तिविरंचमिति सरोमांचितमाह नेममिति विरिंच्यः पुत्रोपि भवः स्वात्मापि २० फलितमाह

एवंस्वगेहदामानि यशोदासंदधत्यपि गोपीनांसुस्मयंतीनां स्मयंती विस्मिताभवत् १७
स्वमातुः स्विन्नगात्राया विस्रस्तकबरस्रजः दृष्ट्वापरिश्रमंकृष्णः कृपयासीत्स्वबंधने १८
एवंसंदर्शिताह्यंगहरिणाभृत्यवश्यता स्ववशेनापिकृष्णेन यस्येदंसेश्वरंवशे १९ ने
मंविरिंच्योनभवोनश्रीरप्यंगसंश्रया प्रसादंलेभिरेगोपी यत्तत्प्राप विमुक्तिदात् २०
नायंसुखापोभगवान्देहिनांगोपिकासुतः ज्ञानिनांचात्मभूतानां यथाभक्तिमतामिह
२१ कृष्णस्तुगृहकृत्येषुव्यग्रायांमातरिप्रभो अद्राक्षीदर्जुनौपूर्वंगुह्यकौधनदात्मजौ
२२ पुरानारदशापेनवृक्षतांप्रापितौमदात् नलकूवरमणिग्रीवाविति ख्यातौश्रियान्वितौ
२३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेनवमोऽध्यायः ९ ॥ रामाय

नायमिति देहिनांदेहाभिमानिनांतापसादीनांज्ञानिनांनिवृत्ताभिमानानामपीति २१ भक्तैर्वश्य
स्याप्यन्यमोचकत्वंवक्तुमाह कृष्णस्त्विति २२ २३ इतिभावार्थदीपिकायांदशमस्कंधेनव १२
मोऽध्यायः ॥ ९ ॥ रामायनमः

दर्पामेयानयद्विगान्नेनतायमलार्जुनौ तत्रत्याध्यांचदेवाभ्यांकृष्णः स्तनन्धीयते यत्तद्विगर्हितंकर्मयेन
वादेवर्षेर्भगवतोनमस्यापितमः क्रोधस्तदेतत्कथ्यतामिति १ २ ३ गंगायामंतर्मध्येकंधमुनेश्रो॥

राजोवाच॥ कथ्यतांभगवन्नेतत्तयोः शापस्यकारणं यत्तद्विगर्हितंकर्मयेनवादेवर्षेस्तमः १
श्रीशुकउवाच॥ रुद्रस्यानुचरौभूत्वासुदृप्तौधनदात्मजौ कैलासोपवनेरम्येमंदाकिन्यांमदो
त्कटौ २ वारुणींमदिरांपीत्वामदाघूर्णितलोचनौ स्त्रीजनैरनुगायद्भिश्चेरतुःपुष्पितेवने ३
अंतः प्रविश्यगंगायामंभोजवनराजिनि चिक्रीडतुर्युवतिभिर्गजाविवकरेणुभिः ४ यदृ
च्छयाचदेवर्षिर्भगवांस्तत्रकौरव अपश्यन्नारदोदेवौक्षीबाणौसमबुध्यत ५ तंदृष्ट्वाव्रीडिता
देव्योविवस्त्राःशापशंकिताः वासांसिपर्यधुःशीघ्रंविवस्त्रौनैवगुह्यकौ ६ तौदृष्ट्वामदिरा
मत्तौश्रीमदांधौसुरात्मजौ तयोरनुग्रहार्थायशापंदास्यन्निदंजगौ ७ ॥

दं।

भोग्यानांवनानितेषांराजयस्ताविद्यंतेयस्मिन् ४ अपश्यन्दृष्ट्वाचक्षीबाणौमत्तौसमबुध्यत ५ ऊनत
त्रयमत्र [illegible] तंदृष्ट्वेति ६ अनुग्रहार्थायस्वानुग्रहःस्वमदनाशः अर्थस्यश्रीकृष्णस्यदर्शनेनतदर्थमि
देवत्वमात्रेणनह्यन्यथात्वादि ७

भा॰ द॰ १८

जोष्यान्प्रियान्विषयाञ्जुषतः सेवमानस्य पुंसः श्रीमदादन्य आभिजात्यादिः सत्कुलविद्यादिजनितो
मदः अन्यो वा रजोगुणः रजः कार्यः हास्यहर्षादिरूपो न हि तथा बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति तथा किं
तु श्रीमद एवेति तदाह यत्रेत्यादि चतुर्भिः यत्र श्रीमदे ८ यत्र श्रीमदे इमं नश्वरं देहं अजरामृत्युम्
जरामरणरहितं स्थिरं यथा तथा मन्यमानैः ९ न त्वेवं देवसंज्ञितमपि श्वादिभिर्भक्षिते विट्संज्ञितं द

श्रीनारद उवाच॥ न ह्यन्यो जुषतो जोष्यान्बुद्धिभ्रंशो रजोगुणः श्रीमदादाभिजात्यादिर्यत्रा
स्त्री द्यूतमासवः ८ हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः मन्यमानैरिमं देहमजरामृत्यु
नश्वरं ९ देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितं भूतध्रुक्तत्कृते स्वार्थं किं वेद निरयो
यतः १० देहः किमन्नदातुः स्वं निषेक्तुर्मातुरेव च मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि
वा ११ एवं साधारणं देहमव्यक्तप्रभवाप्ययं को विद्वानात्मसात्कृत्वा हन्ति जन्तूनृतेऽसतः १२

ग्धं भस्मसंज्ञितं अन्यदा कृमिसंज्ञितं तत्कृते तदर्थं यो भूतध्रुक् द्रोग्धा यतो भूतद्रोहान्निरयो भ-
वति स किं स्वार्थं वेद न वेदैवेत्यर्थः १० निषेक्तुः पितुः मातुः पितुर्वा मातामहस्य पुत्रिकाकरणे ११
अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवस्तस्मिन्नेवाप्ययो यस्य तम् आत्मसात्कृत्वा आत्मेति मत्वा अ-
सतो मूढादृते १२

एवं श्रीमदविचेष्टितमुक्त्वा तत्प्रतीकारं निष्किंचनत्वमसत इति परं श्रेष्ठं दारिद्र्यमेव केवलमिति वाकुत
इत्यत आह आत्मौपम्येनेति ततो न द्रुह्यतीति भावः १३ दृष्टान्तमाह यथेति मुखम्लान्यादि।
लिंगैः सर्वेषां जीवानां साम्यं गतः स्वदेहे विसंभवति ताम वा नित्यर्थः १४ किंच दारिद्र्यमोदमपि साधयतीत्या।

असतः श्रीमदांधस्य दारिद्र्यं परमंजनं आत्मौपम्येन भूतानि दरिद्रः परमीक्षते १३ यथा कंटा।
कविद्धांगो जंतोर्नेच्छति तां व्यथां जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः १४ दरिद्रो निरहं
स्तंभो मुक्तः सर्वमदैरिह कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः १५ नित्यं क्षुत्क्षामदेहस्य द
रिद्रस्यान्नकांक्षिणः इंद्रियाण्यनुशुष्यंति हिंसापि विनिवर्तते १६ दरिद्रस्यैव युज्यंते साधवः स
मदर्शिनः सद्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति १७ साधूनां समचित्तानां मुकुंदचरणै
षिणां उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः १८ तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदांध
योः तमोमदहरं कुर्यां स्त्रैणयोरजितात्मनोः १९ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमः प्लुतौ
न विवाससमात्मानं विजानीतः सुदुर्मदौ २०

ह दरिद्र इति श्लोकचतुष्टयेन निरहंस्तंभो निर्गतः अहंकाररूपः स्तंभो यस्मात्सः १५ १६ युज्यंते
सत एव संगच्छंते तर्षं तृष्णां १७ ननु साधूनामपि धनिकः प्रियः स्यात्तत्र दरिद्र इति तत्राह साधूना
मिति धनेन स्तंभो गर्वो येषां तैः १८ तमोमदं अज्ञानकृतं मदं १९ तमः प्लुतौ तमोव्याप्तौ २०

भा० द० ३९ प्राप्नोति अतः अर्हतः इति अनुग्रहात् इति स्यातां नैवमित्यादिना मत्प्रसादेन स्मृतिः स्यात् २१ स्वर्लोकं तौ ।
देवत्वे पुनर्लब्ध्वा मदनुग्रहाल्लब्धभक्ती भविष्यथः इति २२ २३ प्रस्तुतमाह ऋषेरिति २४ किमिति स
त्यकर्तृत्वं तत्राह देवर्षिरिति यद्यतः तत्ततः २५ यमयोर्यमलयोः सहजातयोः आत्मनः कुस्म

अतोऽर्हतः स्थावरतां स्यातां नैवं यथा पुनः स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् २१ वा ।
सुदेवस्य सान्निध्यं लब्ध्वा दिव्यशरच्छते वृत्ते स्वर्लोकतां मय्यालब्धभक्ती भविष्यथः २२ ॥श्री
शुक उवाच ॥ एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमं नलकूवरमणिग्रीवावासतुर्यमलार्जु
नौ २३ ऋषेर्भागवतमुख्यस्य सत्यं कर्तुं वचो हरिः जगाम शनकैस्तत्र यत्रास्तां यमलार्जु ।
नौ २४ देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना
२५ इत्यन्तरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं ।
२६ बालेन निःकर्षयतान्वगुलूखलं तद्दामोदरेण तरसोत्कलितांघ्रिबन्धौ निष्पेततुः पर
मविक्रमितातिवेपस्कन्धप्रवालविटपौ कृतचण्डशब्दौ २७ ॥

स्यातन्मध्ये प्रवेशमात्रेण २६ अ
न्वगच्छतीत्यन्वकृत तत्र हेतुः दामोदरेणेति उत्कलितः उत्पाटितः अंघ्रिबन्धो मूलबन्धो ययोस्तौ ।
परमस्य श्रीकृष्णस्य विक्रमितेन विक्रमस्तेनातिवेपः कम्पो येषु ते स्कन्धप्रवालविटपा ययोस्तौ २७ ३९

ककुभःप्रतिसर्वतःस्फुरन्तावित्यर्थः यद्वादिशःप्रकाशयन्ताविति कुजयोःवृक्षयोःस्थितोऽग्निर्यथा
मूर्तिमानुपैतितथोपेत्यविरजसौनिर्मदौ २८ गोपालेमायुवांदेवौकिमितिप्रणतावितिचेत्तत्राह
तुः हेकृष्णकृष्णमहायोगिन् अचिन्त्यप्रभावस्त्वंनबालः किंतुपरःपुरुषःयतआद्यःकारणम्अतः
तत्रापिननिमित्तमात्रं किंतूपादानमपित्वमेवेत्याशयेनाहतुःव्यक्ताव्यक्तमितिस्थूलसूक्ष्म

ततश्रियापरमयाककुभःस्फुरन्तौसिद्धावुपेत्यकुजयोरिवजातवेदाः कृष्णंप्रणम्यशिरसाखि
ललोकनाथंबद्धाञ्जलीविरजसाविदमूचतुःस्म २८ कृष्णकृष्णमहायोगिंस्त्वमाद्यःपुरुषः
परः व्यक्ताव्यक्तमिदंविश्वंरूपंतेब्राह्मणाविदुः २९ त्वमेकःसर्वभूतानांदेहास्वात्मेन्द्रिये
श्वरः त्वमेवकालोभगवान्विष्णुरव्ययईश्वरः ३० त्वंमहान्प्रकृतिःसूक्ष्मारजःसत्त्वतमोमयी
त्वमेवपुरुषोऽध्यक्षःसर्वक्षेत्रविकारवित् ३१ ॥

मिदंतेरूपंविदुः २९ नियन्तापित्वमेवेत्याहतुःत्वमेकइति देहःअसवःप्राणाःआत्माहङ्कारःइं
द्रियाणिचतेषामीश्वरः ३० नकेवलंकालोनिमित्तंप्रकृतिरुपादानंप्रकृतेर्जातोमहानित्यात्मतयाप
रिणमतेपुरुषःकर्तानियन्ताचकिमत्राह मतस्त्राहतुःत्वमेवकालइत्यादिनासार्द्धेन यतोभग
वानीश्वरोविष्णुस्त्वमतःकालोनामतवलीला प्रकृतिःशक्तिःपुरुषोंऽशः महान्कार्यम् अत
स्त्वमेवसर्वमित्यर्थः ३१ ॥

ननु अहमेव चेत्सर्वं तर्हि यदा हि ज्ञानं किं न भवति भवति चेत्सर्वोपि ब्रह्मवित्स्यात् अत आहतुः ग्र
भा० ह्यमाणैरिति दृश्यत्वेन वर्तमानैर्बुद्ध्यहंकारेंद्रियादिभिर्ग्राह्यत्वेन न ग्राह्यस इति भावः ननु तर्हि जी
द० पू० वो ज्ञाना तु नैवेत्याहतुः कोन्विहेति जीवाद्युत्पत्तेः प्रागेव स्वप्रकाशतया सिद्धं त्वां को वा जानाति
४ गुणसंवृतः देहाद्यावृतः ३२ अतो दुर्ज्ञेयत्वात्केवलं प्रणाममेव तस्मै तुभ्यमिति आत्मनः स्वा

गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः कोन्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः
३२ तस्मै तुभ्यं भगवते वासुदेवाय वेधसे आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ३३
यस्यावतारा ज्ञायंते शरीरेष्वशरीरिणः तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ३४ स भ
वान्सर्वलोकस्य भवाय विभवाय च अवतीर्णोंशभागेन सांप्रतं पतिराशिषां ३५ नमः परम
कल्याण नमः परममंगल वासुदेवाय शांताय यदूनां पतये नमः ३६ अनुजानीहि नौ
भूमंस्तवानुचरकिंकरौ दर्शनं नौ भगवत ऋषेरासीदनुग्रहात् ३७

स्वात्मद्योतः प्रकाशो येषां तैर्गुणैश्छन्नो महिमा यस्य अभ्रैरिव रविः तस्मै ३३ अहो हमीश्वरस्य ति
कुतो ज्ञातं तत्राह तुः यस्येति ३४ भवायोद्भवाय विभवाय विनाशाय भवो यस्मिन्नस्ति तस्मै केवल्या
येत्यर्थः ३५ ३६ नौ आवां अनुचरः कुवेरो नारदो वा तस्य किंकरौ भगवतस्तव दर्शने ३७ ४

तत्रगतयोरावयोः पूर्वस्वभावोमाभूत् किंतु वाणीगुणानुकथनइत्यादिना अस्मदोर्द्वयोरप्येतिद्विव
चनस्थानेवहुवचनं अस्मात्संगिनांसर्वेषामपीतिवावहुवचनं तवनिवासभूतंयज्जगतस्यप्रणा
मे तन्निवासभूतमितिवहुमानेनजगतःप्रणामेशिरोस्त्वित्यर्थः भवत्तनूनांभवन्मूर्तीनां ३८

वाणीगुणानुकथनेश्रवणौकथायांहस्तौचकर्मसुमनस्तवपादयोर्नः स्मृत्यांशिरस्तव
निवासजगत्प्रणामेदृष्टिःसतांदर्शनेस्तुभवत्तनूनां ३८ ॥श्रीशुकउवाच॥इत्थंसंकीर्ति
तस्ताभ्यांभगवान्गोकुलेश्वरः दाम्नाचोलूखलेवद्धःप्रहसन्नाहगुह्यकौ ३९ श्रीभ
गवानुवाच ज्ञातंममपुरैवैतदृषिणाकरुणात्मना यच्छ्रीमदान्धयोर्वाग्भिर्विभ्रंशोनु
ग्रहःकृतः ४० साधूनांसमचित्तानांसुतरांमत्कृतात्मनांदर्शनान्नोभवेद्वंधःपुंसोक्ष्णोःसवि
तुर्यथा ४१

संकीर्तितःसंस्तुतः ३९ वाग्भिर्नेह्यन्योन्यबलोजोष्मानित्याद्याभिः श्रीविभ्रंशरूपोनुग्रहःकृ
तइति ४० युक्तमेवैतदित्याह साधूनांस्वधर्मवर्तिनां समचित्तानामात्मविदांसुतरांमत्कृतात्म
नांमय्यर्पितचित्तानांतेषांकृपातिरेकात्सुतरामित्युक्तं सवितुर्दर्शनादक्ष्णोर्यथावंधोनभवेत्त
द्वत् ४१ ॥ ॥

भा॰ द॰ ४१ पू॰

प्राधान्यात्देकस्य संबोधनं हे नलकूवरगुवोनतत्साम्यात् नं सदनं स्वनिकेतनं मत्परमौ संतौ गच्छतं
युवयोर्येतितौ मयि प्रेमा जातएव ग्रभवः न भवो यस्मिन्सः ४२ बद्धोलूखले बद्धमुलूखलं य
स्मिन्कर्मे ४३ ॥इति दशमे दशमः १०॥ एकादशे समागान्येद्वृन्दावनमण्यार्भकः वत्सान्पालयता

नगच्छतं मत्परमौ नलकूवरसादनं संजातो मयि भावो वामीप्सितः परमो भवः ४२ ॥श्रीशुक
उवाच॥ इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्त
रां ४३ ॥इति श्रीभागवते महापुराणे दशमस्कंधे द्रुमपातो नाम दशमोध्यायः॥१०॥श्रीशुक उवा
च॥ गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवं तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः १
भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणं २

नेन हतौ वत्सवकासुरौ निर्घातो वज्रपात इति भयेन शंकिताः १ नलसंप्रत्ययात्ततः पुरतो हा॰ ४१
श्यमपि पतनकारणम विज्ञाय बभ्रमुः २ ॥

लब्धं कारणं दर्शयति उलूखलमिति भ्रमप्रकारमाह कस्येदं तत्साध्यं कर्म कुतो वा कारणात् ।
अहो आश्चर्यं उत्पात इति कातराः भीताः सन्तो बभ्रमुरित्यर्थः ३ मध्यगतेन वृक्षयोर्मध्यगतेन न के
वलमेतावत् वृक्षाभ्यां निर्गतौ द्वौ पुरुषावप्यचक्ष्महि दृष्टवन्तो वयमिति ४ केवलं तार्किका
ननात्कृरेव अन्येन संदेहयुक्ताश्चिन्तां बभूवुरिति ५ भगवन्मायाविमोहितमनसां दृष्ट्वा चरितमा

उलूखलं विकर्षन्तं दाम्ना बद्धं च बालकं कस्येदं कुत आश्चर्यमुत्पात इति कातराः ३ बाला ऊचु
रनेनेति तिर्यग्गतमुलूखलं विकर्षता मध्यगेन पुरुषावप्यचक्ष्महि ४ न ते तदुक्तं जगृ
हुर्न घटेतेति तस्य तत् बालस्योत्पाटनं तर्वोः केचित्संदिग्धचेतसः ५ उलूखलं विकर्षन्तं
दाम्ना बद्धं स्वमात्मजं विलोक्य नन्दः प्रहसद्वदनो विमुमोच ह ६ गोपीभिः स्तोभितोऽनृत्यद्
भगवान्बालवत्क्वचित् उद्गायति क्वचिन्मुग्धस्तद्वशो दारुयन्त्रवत् ७ बिभर्ति क्वचिदाज्ञप्तः पी
ठकोन्मानपादुकं बाहुक्षेपं च कुरुते स्वानां च प्रीतिमावहन् ८

हउलूखलमिति ६ स्तोभितो नर्तित इति शंकमानो नृत्यमनुकरोति स्म तदाह गोपीभिरिति ।
स्तोभितः करतलादिना प्रोत्साहितः ७ इदमानयेत्याज्ञप्तः आनेतुमसमर्थ इव बिभर्ति केवलं पी
ठादि बाहुक्षेपं करचालनं तत्र ह्रीदो चेति चकारस्यान्वयः ८ ॥

तवचेष्टां ये विदंति ये तेषां एवं व्रजस्य हर्षमवाहेति ९ ७ रेजे वृंदावने गत्वा मेनेः कृष्णेन यं त्रिताः सजे

दर्शयंस्तद्धितां लोकस्यात्मनो भक्तवश्यतां व्रजस्योवाह वै हर्षं भगवान्बालचेष्टितैः ९ सचितो
रात्तं कृष्णमग्रजेनमप्याह्वयत् नमस्तं मधुभवतो विप्रेभ्यो देहि गाः शुचिः १० पयपयपयव
यस्यास्ते मातरस्मृष्टान्स्वलेह्कतान् तं च स्नातः कृताहारो विहरस्व स्वलंकृतः ११ नो ये यातो
यदा हूतो क्रीडासंगेन पुत्रको यशोदां प्रेषयामास रोहिणीं पुत्रवत्सला १२ इत्थं यशोदा तनमा
पोषशोवरीम त्वा सुतं स्नेह निवद्धधीर्नृप हस्ते गृहीत्वा सहरामम च्युतं नीत्वा स्ववाट कृतवा
त्यथोदयं १३ क्रीडंतं सा सुतं बालैरतिवेलं सहाग्रजं यशोदाजोहवी कृष्णं पुत्रस्नेहस्नुतस्त
नी १४ कृष्णकृष्णारविंदाक्ष तात एहि स्तनं पिब अलं विहारैः क्षुत्क्षांतः क्रीडाश्रांतोसि पु
त्रक १५ हे रामागच्छ ताताशु सानुजः कुलनंदन प्रातरेव कृताहारस्तद्भवान्भोक्तुमर्हति
१६ प्रतीक्षते त्वां दाशार्ह भोक्ष्यमाणो व्रजाधिपः एह्यावयोः प्रियं धेहि स्वगृहान्यात बालकाः
इत्यानीय गृहे कृष्णं यशोदा मंगलाहितैः अभ्यंग्य भोजयित्वा तमस्नापयत्शोभितो १७ ॥श्री
कृ॥ गोपवृद्धा महोत्पातान् अनुभूय बृहद्वने नंदादयः समागम्य व्रजकार्यममंत्रयन् तत्रो
पनंदनामाह गोपो ज्ञानवयोधिकः देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः १८ उत्था
तव्यमितोस्माभिर्गोकुलस्य हितैषिभिः आयांत्यत्र महोत्पाता बालानां नाशहेतवः मुक्तः

आपूर्वनंदाद्यामेत्रमेतममंत्रयन् व्रजकार्यं गोकुलस्य हितकृत्ये २ २१ ॥ ८८।

विपदं कीनां पक्षिणां पदं विहारस्थानं वियत् विगतप्रविष्टं वा २२ अन्यो वा कश्चिद्बालः अच्युतेन
रक्षणमासीत् २३ अरिष्टः अनर्थः इतः स्थानात् २४ पशव्यं पशुभ्यो हितं नवानि वनान्यवांतरा

चक्रवातेन नीतोयं दैत्येन विपदं वियत् शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः २२ यन्न
म्रियेत द्रुमयोरंतरं प्राप्य बालकः असावन्यतमो वापि तदप्यच्युतरक्षणं २३ यावदौत्पाति
कोरिष्टो व्रजं नाभिभवेदितः तावद्बालानुपादाय यास्यामोन्यत्र सानुगाः २४ वनं वृंदावनं
नाम पशव्यं नवकाननं गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधं २५ तत्तत्राद्यैव यास्यामः
शकटान्युंक्त माचिरं गोधनान्यग्रतो यांतु भवतां यदि रोचते २६ तच्छ्रुत्वैकधियो गोपाः
साधु साध्विति वादिनः व्रजान्स्वान्स्वान्समायुज्य ययू रूढपरिच्छदाः २७ वृद्धान्बालान्स्त्रि
२स्क यो राजन्सर्वोपकरणानि च अनःस्वारोप्य गोपाला यत्ता आत्तशरासनाः २८ गोधनानि पु
रस्कृत्य शृंगाण्यापूर्य सर्वतः तूर्यघोषेण महता ययुः सहपुरोहिताः २९ गोप्यो रूढर
थानूत्नकुचकुंकुमकांतयः कृष्णलीला जगुः प्रीता निष्ककंठ्यः सुवाससः ३०

णि विद्यंते यस्मिन् तत् २५ २६ एकधियः विप्रतिपत्तिरहिताः व्रजान् शकटव्यूहान् रूढाः शक
टान्यारोपिताः परिच्छदा यैस्ते २७ २८ २९ ३०

भा॰द॰
७२

नुक्तैः ऋचनानैः कृष्णैः कोतियांसांताः नन्वेषु कृचेषु यत् कृष्णमेनेन कोतियांसामितिवा ३१ व्र
नावासं गोकुलावेतावसतिस्थाने ३२ ३३ स्वकालेन तत्तद्योग्यकालेन ३४ कौमारलीलां निरूपयं
ति अविदूर इत्यादिना ३५ क्षेपणैः विल्वामलकादिभिः किंकिणीयुक्तैः पादैः क्षिपतः नादय

तथा यशोदारोहिण्यावेकं शाकटमास्थिते रेजतुः कृष्णरामामाभ्यां तत्कथाश्रवणोत्सु
के ३१ वृंदावनं संप्रविश्य सर्वकालसुखावहं तत्र चक्रुर्व्रजावासं शकटैरर्द्धचंद्रव
त् ३२ वृंदावनं गोवर्द्धनं यमुनापुलिनानि च वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप
३३ एवं व्रजौकसां प्रीतिं यच्छंतौ बालचेष्टितैः कलवाक्यैः स्वकालेन वत्सपालौ बभूव
तुः ३४ अविदूरे व्रजभुवः सह गोपालदारकैः चारयामासतुर्वत्सान्नानाक्रीडापरिच्छ
परौः दौ ३५ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् क्वचित्पादैः किंकिणीभिः क्वचित्कृत्रि
मगोवृषैः ३६ वृषायमाणौ नर्दंतौ युयुधाते परस्परं अनुकृत्य रुतैर्जंतूंश्चेरतुः प्राकृ
तौ यथा ३७ कदाचिद्यमुनातीरे वत्सांश्चारयतोः स्वकैः वयस्यैः कृष्णबलयोर्जिघांसु
र्दैत्य आगमत् ३८

टतः वत्सपाला एव द्वित्राः कंबलादिपिहिताः वृषरूपमनुकुर्वंति तैः सह ३६ स्वयमपि त
थैव वृषायमाणौ नर्दंतौ नदंतका रिपाह्वानं कुर्वंतौ युयुधाते इत्यर्थः रुतैः शब्दैः जंतून् हंस

मध्यस्थाज्ञानन्निवर्षानैः आसदत् समीपमागमत् ३९ अपरपादाभ्यां सल्लोमहलेयथाभवतितथा
गृहीता ४० ४१ सर्वेषांलोकानांएकोमहोपालको प्रातराणः प्रातर्भोज्यमन्नेतत्सहितो ४२ अ

तंवत्सरूपिणंवीत्यवत्सरूपगतेहरिः दर्शयन्नलदेवायशनैर्मध्यस्थामासदत् ३९ गृहीतापर
पादाभ्यांसहलोमहलमच्युतः भ्रामयित्वाकपित्थाग्रेप्राहिणोद्गतजीवितं सकपित्थैर्महाका
यः पात्यमानैः पपातह ४० तंवीत्यविस्मिताबालाः शशंसुः साधुसाध्विति देवाश्चपरिसंत
ष्टावभवुःपुष्पवर्षिणाः ४१ तौवत्सपालकौभूत्वासर्वलोकैकपालकौ सप्रातराशौगोव
त्सांश्चारयंतौविचेरतुः ४२ स्वंस्वंवत्सकुलंसर्वेपाययिष्यंतएकदा गत्वाजलाशयाभ्यासे
पाययित्वापपुर्जलं ४३ तेतत्रददृशुर्बालामहासत्वमवस्थितं तत्रसुवेत्त्वतिभिन्नगिरेःशृं
गमिवच्युतं ४४ सवैबकोनाममहानसुरोबकरूपधृक् आगत्यसहसाकृष्णंतीक्ष्णतुंडो
मुनिरिवनिश्चलांबुःवभूव सम्यव्युपरतागमः निवृत्तवेदघोषःसमुनिरिवतूष्णींवभूव समुद्रः

नैवाविंदन्क्षीयमाणंजलंगाधजलेचराः यथायुरन्वहंक्षय्यंनराः मूढाःकुटुंबिनः ३७ गा
धवारिचराःतापमविंदन्शरदर्कजम् यथादरिद्रःकृपणःकुटुंब्यविजितेंद्रियः ३८ शनैः
शनैर्जहुःपंकंस्थलान्यामांचवीरुधः यथाहंममतांधीराःशरीरादिष्वनात्मसु ३९ निश्च
लांबुरभूत्तूष्णींसमुद्रःशरदागमे आत्मन्युपरतेसम्यङ्मुनिर्व्युपरतागमः ४० केदारेभ्यस्त्व
पोगृह्णन्कर्षकादृढसेतुभिः यथाप्राणैःस्रवज्ज्ञानंतन्निरोधेनयोगिनः ४१ शरदर्कां
शुजांस्तापान्भूतानामुडुपोहरत् देहाभिमानजंबोधंमुकुंदोव्रजयोषिताम् ४२ खमशोभ
तनिर्मेघंशरद्विमलतारकम् सत्वयुक्तंयथाचित्तंशब्दब्रह्मार्थदर्शनम् ४३ अखंडमंडलो
व्योम्निरराजोडुगणैःशशी यथायदुपतिःकृष्णोवृष्णिचक्रावृतोभुवि ४४ ॥

ति ४० केदारेभ्योवहत्सेतरसलिलेभ्योदृढैःसेतुभिरपःअगृह्णन्ततःपरंवहत्वाभावात् योगीनिरिंद्रियेत
न्निरोधेनइंद्रियप्रत्याहारेण ४१ देहाभिमानजंबोधमिवव्रजयोषितांमुकुंदइवतापान्यथैः ४२ शारदावि
मलाःतारकायस्मिंस्तत्खंशब्दब्रह्मणोवेदस्यार्थान् सर्वोत्तरमीमांसानिर्णीतान्दर्शयतीतित

॥ स्क १० ॥ ८२

तमोन्नानानथिकः शीतंचोष्णंस्वतं प्रफुल्लकुसुमसंयुक्तंमारुतमाश्लिष्यजनाः तापंजहुः नतुगोप्यः
यतः कृष्णापहृतचेतसः तेनकारणेनतासांउडुः सहइति यद्वा नकारउपमार्थः गोप्यइवकृष्णगतचेत
सइतिवतसाकृष्णमालिंग्ययथागोप्यः तापंजहुरित्यर्थः ४५ पुष्पिण्यःभार्याः अन्वीयमानाःस्ववृ
षैःस्वपतिभिः अनिर्दतापिबलादनुगम्यमानाःईश्वराराधनार्थाःक्रियायत्नात्फलैरनुगम्यमानाःसमस्तभा
गगर्भाभवंतीति ४६ कुमुत्तुकुमुदंकुमुत्सितोमत्तस्यसेतिदस्युसाम्यं ४७ आग्रायणैर्नवान्नप्राशनार्थैर्वै

आश्लिष्यसमशीतोष्णंप्रसूनवनमारुतं जनास्तापंजहुर्गोप्योनकृष्णहृतचेतसः ४५ गावोमृ
गाःखगानार्यःपुष्पिण्यःशरदाभवन् अन्वीयमानाःस्ववृषैःफलैरीशक्रियाइव ४६ उदहृष्य
न्वारिजानिसूर्योत्थानेकुमुद्विना राज्ञातुनिर्भयालोकाःयथादस्यून्विनानृप ४७ पुरग्रामेष्वाग्र
यणैरिंद्रियैश्चमहोत्सवैः बभौभूःपक्वसस्याढ्याकलाभ्यांनितरांहरेः ४८ वणिक्मुनिनृपस्ना
तानिर्गम्यार्थान्प्रपेदिरे वर्षरुद्धायथासिद्धाःस्वपिंडान्कालआगते ४९ इतिश्रीभागवतेदशमे
विंशतितमोध्यायः २० ॥

रिकैःपैंद्रियैरिंद्रियार्थैःलौकिकैश्चम होत्सवैःकलाभ्यांरामकृष्णाभ्यांदा
र्शनादिमहोत्सवाभ्यां ४८ वणिजोयतयोनृपाःस्नातकाश्चदृष्टाहृष्टाभ्यावर्षरुद्धाःसंतः तेतानिर्गम्या
र्थान्वाणिज्यलाभंक्यादिदिग्विजयविद्यादीन्प्रपेदिरेप्रापुर्यथा मंत्रयोगादिसिद्धाःआवृष्टारुद्धाका
लेआगतेस्वपिंडान्सोमादिप्राप्यान्देवादिदेहान्दिति ४९ इतिभावार्थेदशमस्कंधेविंशोध्यायः २०

श्री॰ भा॰ द॰ सू॰ टी॰ ८३

एकविंशे शारदस्य वृंदावनगमने हरेः तद्वेणुस्वनमाकर्ण्य गोपीभिर्गीतमीर्यते इत्थमेवंभूतं वनं तदेवाह
शरदा स्वच्छानि जलानि यस्मिंस्तत् वायुना वातमनुगतं वनं सदेकस्थानमित्यर्थः १ ततः कुसुमितवनराजि
शुष्मिणो मत्ताः भृंगा द्विजाश्च तेषां कुलानि तैर्घुष्टानि सरांसि सरितो महीध्राश्च यस्मिंस्तद्वनं कृष्णोऽवगा
ह्य प्रविश्य वेणुमवादयत् २ तत्कृष्णस्य वेणुगीतं स्मरस्य उदयो यस्मात् तत् श्रुत्वा परोक्षं यथा भवति म

श्रीशुक उवाच इत्थं शरत्स्वच्छजलं पद्माकरसुगंधिना न्यविशद्वायुना वातं सगोगोपाल
कोऽच्युतः १ कुसुमितवनराजिशुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रं मधुपतिरवगाह्य चा
रयन् गाः सहपशुपालबलश्चुकूज वेणुं २ तद्व्रजस्त्रिय आकर्ण्य वेणुगीतं स्मरोदयं काश्चि
त्परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णयन् ३ तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचेष्टितं नाशकन्
स्मरवेगेन विक्षिप्तमनसो नृप ४ बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद्वासः कन
ककपिशं वैजयंतीं च मालां रंध्रान्वेणोरधरसुधया पूरयन्गोपवृंदैर्वृंदारण्यं स्वपदरमणं प्राविश
(द्गीतकीर्तिः ५

जेस्थितत्वात् ३ विक्षिप्तमनसो व्याकुलचित्ताभीता ४ यादृक्कृष्णस्मर
णात्तासां मनसः क्षोभकं जातं तदाह बर्हापीडमिति नटवद्वरं वपुर्बिभ्रत् वृंदावनं प्राविशत् कथंभू
तं वनं स्वपदैः अंकितैः रमणं रतिजनकं गोपवृंदैः गीतकीर्तिः तथा बर्हमयमापीडं शिरोभूषणं बिभ्रद्
हेमापीडाय स्मिन्ननितिवर्ष्मो विशेषणं वा वेणुवादनस्तुत्यत्वात् रंध्रान्वेणोरिति अधरामृतमधरसुधे
वर्णाद्वेणोर्हृष्टलतो गीतवन्तसर्पिण्यतमर्हंतीति भावः ५ ॥ ८३

अभिरेभिरे वर्णयंतः पदे पदे परमानंदमूर्तिं श्रीकृष्णं परिषस्वजिरे ६ अनुवर्णनमेवाह अक्षिण्वता
मिति त्रयोदशभिः अक्षिण्वतां चक्षुष्मतां तावदिदमेव फलं प्रियदर्शनं परमन्यन्न विदामः न विद्म इ
त्यर्थः तच्च फलं सखिभिः सह पशूननु वनं प्रवेशयतोः रामकेशवयोर्वक्त्रं यैर्निपीतं तैरेव जुष्टं सेवितं
नान्यैरित्यर्थः कथंभूतं वक्त्रं अनुवेणुमनुवर्तमानेन वादयता तथा अनुरक्तकटाक्षमोक्षं स्निग्धकटा

इति वेणुरवं राजन्सर्वभूतमनोरमं श्रुत्वा व्रजस्त्रियः सर्वा वर्णयंत्योभिरेभि
रे ६ गोप्य ऊचुः अक्षिण्वतां फलमिदं न परं विदामः सख्यः पशूननुवि
वेशयतोर्वयस्यैः वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपीतमनुरक्तक
टाक्षमोक्षं ७ चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधान
विचित्रवेषौ मध्ये विरेजतुरलं पशुपालगोष्ठ्यां रंगे यथा नटव
रौ क्वच गायमानौ ८ रामायनमः

क्षविसर्गं अथवा यैर्निपीतं तयोर्वक्त्रं ते यज्जुष्टमेतदेवाक्षिण्वतामक्ष्णोः फलमिति ७ अन्याश्चा
हुः चूतेति चूतप्रवालादीनां विचित्राभिर्मालाभिरनुपृक्ते ईषद्रंजितान्तरतः संपृक्ते परिधाने नीला
पीतांबरे ताभ्यां विचित्रौ वेषौ ययोस्तौ क्वचक्वचित्पशुपालगोष्ठ्यां गोपालसभायां मध्येऽलमत्य
र्थं विरेजतुः अहो गोपानां भाग्यमिति भावः ८ ॥

श्री॰ भा॰ र॰ मू॰ टी॰ ८४ हे गोप्यः अयं वेणुः किं स्वपुण्यमाचरत् कृतवान् कथं यद्यस्मात् गोपिकानामेव भोग्यां सतीमपि
दामोदराधरसुधां स्वयं स्वातंत्र्येणात्यर्थं भुंक्ते कथं च अवशिष्टरसं केवलमवशिष्टरसमात्रं यथा
भवति यतो यासां पयसा पुष्टः तास्मात् ह्रदिन्यः हृष्यत्त्वचः विकसितकमलवननिभेन रो
मांचिता लक्ष्यंते येषां वंशजातः तेतरवो मधुधारानिभेनानंदाश्रु मुमुचुः यथार्याः कुलवृद्धाः स्व
वंशे श्रीभगवत्कं दृष्ट्वा हृष्यत्त्वचोऽश्रु मुंचंतीति तद्वदिति ९ हे सखि वृंदावनं भुवः कीर्तिं स्वर्गादपि विशे

अन्या ऊचुः गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गो
पिकानां भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो य
थार्याः ९ काश्चिदूचुः वृंदावनं सखि भुवो वितनोति कीर्तिं यद्देवकी-
सुतपदांबुजलब्धलक्ष्मि गोविंदवेणुमनु मत्तमयूरनृत्यं प्रेक्ष्याद्रि
सान्वपरतान्यसमस्तसत्त्वं १० ॥ रामाय

षेणा तनोति विस्तारयति कथंभूतं यद्देवकीसुतस्य पादांबुजाभ्यां लब्धा लक्ष्मीः शोभासंपद्ये
न तत् किंच गोविंदस्य वेणुमनु वेणुनिनादं श्रुत्वा अनंतरं मदगर्जितनीलमेघं तं मत्वा मत्ता ये ८४
मयूराः तेषां नृत्यं प्रेक्ष्य संचयशः तत्रत्या अद्रिसानुषु अपरतानि उपरतक्रियाणि अन्यानि समस्तानि स
त्वानि यस्मिंस्तत् नैतदन्येषु लोकेषु विद्यते अतो भुवः कीर्तिं वितनोतीत्यर्थः १० ॥

हे सखि मूढमतयः तिर्यग्जातयोऽपि एता हरिण्यो धन्याः कृतार्थाः या वेणुरणितं वेणुनादमाकर्ण्य नंदनंद
नं प्रति प्रणयसहितैरवलोकनैर्वि रचितां पूजां सम्मानं दधुः कृतवत्यः किंच कृष्णसारैः स्वपतिभिः स
हिता एव दधुः अस्मत्पतयस्तु गोपाः तद्वद्धाः समन्ततत्र सहृदयता इति भावः स्म विस्मये ११ हे गोप्य आश्च
र्यं शृणुत वनितानामुत्सवो यस्मात् तद्रूपं शीलं च यस्य तं श्रीकृष्णं निरीक्ष्य तेन वादितवेणोः संकीर्णगी।
तं च श्रुत्वा विमानैर्गच्छंत्यो देव्यो देवानामंकेषु स्थिता अपि स्मरेणात्तत्रसागः परिहितमध्येयोः सुभङ्गः मो

अपरा ऊचुः धन्याः स्म मूढमतयोऽपि हरिण्य एता या नंदनंदनमुपात्तविचित्रवेषं आकर्ण्य वेणुरणितं
सहकृष्णसारैः पूजां दधुर्विरचितां प्रणयावलोकैः ११ अन्या ऊचुः कृष्णं निरीक्ष्य वनितोत्सवरू
पशीलं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतं देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकब
रा मुमुहुर्विनीव्यः १२ अन्या ऊचुः गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्ण।
पुटैः पिबंत्यः शावाः स्नुतस्तनपयःकवलाः स्म तस्थुर्गोविंदमात्मनि दृशाश्रुकलाः स्पृशं
त्यः १३

हे लिंगमाङ्गः भ्रश्यत्प्रसूनाः कबर्यश्चूडा यासां ताः विगतानि नीव्यो यासां ताः १२ अत्र स
वेत्रवक्त्रभेदान्नातीव संगतिर्वेत्येत्या अन्या ऊचुः हरिणांशाकयेवोत्तभितमूर्ध्वमितैः कर्णपुटैः पिबं
त्यः सत्यः तथा शावा वत्सा अपि स्तनपाने प्रवृत्ताः समनंतरमेव गीतं श्रुत्वा तदेव पीयूषमुत्तभितकर्ण
पुटैः पिबंतः स्नुतस्तनपयःकवलाः केवलं स्तनेभ्यः स्नुतं क्षीरग्रासाः मुखे येषां ते तस्थुः विस्मृतकि
वभूवुरित्यर्थः तत्र हेतुः गोविंदं दृग्मार्गेण आत्मनि स्पृशंत्यः अत एव अश्रूणां कणा लेशा लोचना।

घोषसंताः गावः नेवकृतः ७ ॥

श्री० भा० द० टी० ८५ हेअंबमातः अस्मिन्वनेयेविहगाः पक्षिणस्तेप्रायेणमुनयोभवितुमर्हंतीति कुतः कृष्णेक्षितंकृष्णदर्श
नेनपुष्पफलाद्यर्थैनरविनाययाभवतितथारुचिराः प्रवालाः येषांतान्द्रुमभुजान्वृक्षाणांशाखाः आ
रुह्यश्रीकृष्णेनोदितंप्रकटितंकलवेणुगीतंकेनापिमुखेननमीलितदृशः त्यक्तान्यवाचःसंतःये
शृण्वंतीति तथाहि मुनयःश्रीकृष्णदर्शनेयथाभवतितथावेदोक्तकर्मफलत्यागेनवेदद्रुमशाखा
रूढाःरुचिरप्रवालस्थानीयानिकर्माण्येवोपाददानाःसात्विकाःसंतःश्रीकृष्णगीतमेवशृण्वंतितेनवा

अम्बाऊचुः प्रायोबताम्बविहगामुनयोवनेस्मिन्कृष्णेक्षितंतदुदितंकलवेणुगीतं आरुह्ययेद्रु
मभुजान्रुचिरप्रवालान्शृण्वंतिमीलितदृशोविगतान्यवाचः १४ नद्यस्तदातदुपधार्यमु
कुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णंतिपादयु
गलंकमलोपहाराः १५ दृष्ट्वातपेव्रजपशून्सहरामगोपैः संचारयंतमनुवेणुमुदीरयंतं
प्रेमप्रवृद्धउदितः कुसुमावलीभिः सख्युर्व्यधात्स्ववपुषाम्बुदआतपत्रम् १६ ॥

स्वदेवद्रुपाभवितुमर्हंतीतिभावः १४ आस्तांचेतनानांकथानद्योपिआवर्तैः परिभ्रमैर्लक्षि
तेनमनोभवेन भग्नोवेगोयासांताः आलिंगनेनस्थगितंमाच्छादितंयथाभवतितथा [redacted]
ऊर्मयएवभुजास्तैःकमलोपहाराः कमलान्युपहारायासांताः मुरारेःपादयुगलंगृह्णंतिधारयंति १५ लोका
तिहारिशीलत्वादिसाम्यात्सख्युःश्रीकृष्णस्यअंबुदः तदुपरिउदितः पुनःप्रेमणाप्रवृद्धःसन्कुसु ८५
मावलीभिःकुसुमसमूहैः जललवैः तुषारैर्वासहस्ववपुषाछत्रंविहितवान् १६ ॥

साहंकारमाह॥ पुलिंद्यः शबरांगनाः पूर्णाः कृतार्थाः कुत इत्यत आह प्रथमं दयितानोस्तनेषु मंडिते
नोत्कलिसेन पुनः स्मृतिसमये उरुगायस्य श्रीकृष्णस्य पादाब्जयो रागेनारुणेन श्रीः कांतिः यस्य तेन पुनस्त
स्यैव तस्य तृणेषु चंक्रमणेन तृणेषु दूषितेन लग्नेन तद्दर्शनेन तथाभूतस्य कुंकुमस्य स्पर्शेनेति स्मरकृताधि
कृताधयो यास्ताः तेन कुंकुमेनानने पुकुचेषु च कामतप्तेषु लिंपत्यः तदाधिकामव्यथां जहुः अत एताः कृता
र्थाः स्थिरान्यामाह यथाः पापवन्नतेन तदाधिशाम नेनलभते इति १७ पुनरप्याश्चर्यं दृष्टेति हर्षे हे सख्यः अयमद्रि
र्गोवर्द्धनो भवेद्धरिदासेषु श्रेष्ठः कुत इत्यत आह यस्माद्रामकृष्णयोः चरणस्पर्शनप्रमोदो यस्य सः तस्मात्
पूर्णाः पुलिंद्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमंडितेन तद्दर्शनस्मररुजस्तृणरूषितेन
लिंपंत्य आननकुचेषु जहुस्तदाधिं १७ हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्शप्र
मोदः मानं तनोति सहगोगणयोस्तयोर्यत्पानीयसूयवसकंदरकंदमूलैः १८ गा गोपकैरनु
वनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः अस्पंदनं गतिमतां पुलकस्तरूणां निर्योग
पाशकृतलक्षणयोर्विचित्रम् १९ ॥ इममिषेणास्य महर्षदर्शनात् किंच तन्मानं तनोति सह
गोगणसहितेन समूहेन च सह वर्त्तमानयोः तयोः पानीयैः सूयवसैः शोभनतृणैः कंदरैः कंदमूलैश्च यथो
चितं अतोऽयमतिधन्य इत्यर्थः १९ हे सख्यः इदं त्वति चित्रं गोपैः सह गाः वने वने संचारयतोस्तयो रा
मकृष्णयोर्मधुरपदैर्महावेणुनादैः प्राणिनश्चलित्वं तेषां समस्पंदनस्थावरधर्मः तरूणां पुलको
जंगमधर्म इति नियुज्यते गावः पुनर्भिर्नियोगाः पादबंधनरज्जवः अथवा गवां बंधनार्थाः पाशा
स्तैः कृतलक्षणयोर्विरुद्धयोः शिरसि नियोगवेष्टनेन स्कंधस्थपाशेन च गोपयोरिति हि दृश्यते विचि

श्री.
भा. द.
पू. टी.
८६

२१ इति भावार्थदीपिकायां दशमस्कन्धे एकविंशोऽध्यायः २१ द्वाविंशे गोपकन्यानां वस्त्राहरणा
लीलया वरं दत्वागतः कृष्णो यज्ञशालामितीर्यते गोपीनां कामतः कृष्णे निःसीमप्रेमसंगमः
कात्यायन्यर्चनाद्भूत तन्न्यासादमहोदयः प्रथमे मासि मार्गशीर्षे १ २ ३ महामाये इत्यादि मंत्रो

एवंविधा भगवतो या वृन्दावनचारिणः वर्णयन्त्यो मिथो गोप्यः क्रीडाः तन्मयतां ययुः २०
इति श्रीभागवते दशमस्कन्धे एकविंशोऽध्यायः २१ श्रीशुक उवाच हेमन्ते प्रथमे मासि नं
दव्रजकुमारिकाः चेरुर्हविष्यं भुञ्जानाः कात्यायन्यर्चनव्रतं १ आप्लुत्याम्भसि कालिन्द्या
जलान्ते चोदितेऽरुणे कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीं २ गन्धैर्माल्यैः सुरभिभिर्ब
फल लिभिर्धूपदीपकैः उच्चावचैश्चोपहारैः प्रवालफलतण्डुलैः ३ कात्यायनि महामाये महायो
गिन्यधीश्वरि नन्दगोपसुतं देवि पतिं मे कुरु ते नमः ४ इति मन्त्रं जपन्त्यस्ताः पूजां चक्रुः
कुमारिकाः एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः भद्रकालीं समानर्चुर्भूयान्नन्द
सुतः पतिः ५ उषस्युत्थाय गोत्रैः स्वैरन्योन्याबद्धबाहवः कृष्णमुच्चैर्जगुर्यान्त्यः कालिन्द्यां स्ना
तुमन्वहं ६ नद्याः कदाचिदागत्य तीरे निक्षिप्य पूर्ववत् वासांसि कृष्णं गायन्त्यो विजह्रुः स
लिले मुदा ७

यैनैः तत्र न किंचिदस्ति कामितमिति सूचयन्त्यः प्रत्येकं प्रार्थयन्ते ४ कृष्णचेतस
मेवाह भूयान्नन्दसुतः पतिरित्यानर्चुरिति ५ व्रतस्य पूर्वांगमाह उषसीति गोत्रैर्नामभिरन्यो

८६

योगेश्वराणामीश्वर इति प्रत्येकं ताहक्लनेभ्यः तासां सामर्थ्यं दर्शयति तासां कर्मणः सिद्धये फलादाय वा
येति ८ नीपं कदंबं बालैः सह ९ हे अबला नोनर्म न परिहासः यस्माद्यूयं व्रतश्रान्ताः १० एकैकशो
वा आगत्य स्वीकुरुत सहैव वा न तत्रास्माकमाग्रह इत्यर्थः ११ क्ष्वेलितं परिहासं प्रेमरसमग्नाः १२ १३ तस्य

भगवांस्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः वयस्यैरावृतस्तत्र गतस्तत्कर्मसिद्धये ८ तासां वासांस्युपा
दाय नीपमारुह्य सत्वरः हसद्भिः प्रहसन्बालैः परिहासमुवाच ह ९ अत्रागत्याबलाः कामं स्वं
स्वं वासः प्रगृह्यतां सत्यं ब्रवाणि नो नर्म यद्यूयं व्रतकर्षिताः १० न मयोदितपूर्वं वा अनृतं तदि
मे विदुः एकैकशः प्रतीच्छध्वं सहैवेति सुमध्यमाः ११ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः
व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः १२ एवं ब्रुवति गोविंदे नर्मणाक्षिप्तचेतसः आकंठ
मग्नाः शीतोदे वेपमानास्तमब्रुवन् १३ गोप्य ऊचुः मानयं भोः कृथाः त्वां तु नंदगोपसुतं प्रियं
जानीमोंग व्रजश्लाघ्यं देहि वासांसि वेपिताः १४ गोप्य ऊचुः श्यामसुंदर ते दास्यः करवाम तवो
दितं देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे १५ श्रीकृष्ण उवाच भवत्यो यदि मे दास्यो मयोक्तं च
करिष्यथ अत्रागत्य स्ववासांसि प्रतीच्छध्वं शुचिस्मिताः १६ ततो जलाशयात्सर्वा दारिकाः शी
तवेपिताः पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः शीतकर्षिताः १७ भगवानाहता वीक्ष्य शुद्धभावप्र
सादितः स्कंधे निधाय वासांसि प्रीतः प्रोवाच सस्मितं १८ ॥ गोप्य ऊचुः अंगाभोः हास्यमनयमन्या
येमाकृथाः १४ गोप्य ऊचुः नो चेद्राज्ञे नंदाय कंसाय वा ब्रुवामहे कोसौ सतीति १५ प्रतीच्छध्वं गृह्णीध्व

श्री॰ भा॰ द॰ सू॰ टी॰ ८१

धृतव्रताः सत्यो विवस्त्रा अपो व्यगाहत अप्सु स्नाता इति यत् तदेनत् उपदेवहेलनं अपराधप
वेत्यर्थः व्रतवैगुण्यभीतानां प्रायश्चित्तमेवाह अत्सांहसः पापस्य निवृत्तये मूर्ध्नि अञ्जलिं बध्वा अ
धोनमः प्रणामं कुर्वन्त्विति १९ इति दोषं तन्न अच्युतेनाभिहितं विवस्त्राप्लवनं व्रतस्य च्युतिं इति मत्वा
तस्य व्रतस्य पूर्तिकामाः तदशेषकर्मणां तस्य व्रतस्यान्येषां अशेषकर्मणां च साक्षात्कृते फलम्

यूयं विवस्त्रा यदपो धृतव्रता विगाहतैतत्तदु देवहेलनं बद्ध्वांजलिं मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा
नमोधो वसनं प्रगृह्यतां १९ इत्यच्युतेनाभिहितं व्रजावला मत्वा विवस्त्राप्लवनं व्रतच्युतिं तत्पूर्
तिकामास्तदशेषकर्मणां साक्षात्कृतं नेमुरवद्यमृग्यतः २० तास्तथावनता दृष्ट्वा भगवान्देव
कीसुतः वासांसि ताभ्यः प्रायच्छत्करुणस्तेन तोषितः २१ दृढं प्रलब्धास्त्रपया च हापिताः प्र
स्तोभिताः क्रीडनवच्च कारिताः वस्त्राणि चैवापहृतान्यथाप्यमुं ता नाभ्यसूयन्प्रियसंगनिर्वृताः
२२ ॥

तेतमेव नेमुः यतः स एवावद्यमृक्पापमार्जकः २० दृढमत्यर्थं प्रलब्धा वंचिताः यूयं विवस्त्रा इत्या
दिना त्रपया लज्जया अवहापिताः त्याजिताः अत्रागत्य वासांसि स्वीकुर्वन्त्वित्याग्रहेण प्रस्तोभिताः उपह ८१
सिताः सत्यं ब्रुवाणि नो नर्मेत्यादिना क्रीडनवत्कारिताः बद्धांजलिमित्यादि प्रायश्चित्तछलेन नाना
भावहूयन् दोषदृष्ट्या नापश्यन् तत्कुतः प्रियसंगनिर्वृताः श्रीकृष्णसंगसाक्षिनाः २२ ॥

प्रेष्टसंगमेनसज्जितावशीकृताः अतोगृहीतचिताःसत्योनोचेलःगृहीतचितत्वमेवाह तस्मिन्कासेल
ज्जायितेक्षणाः लज्जाविलसितमीलाण्यासाताः २३ दोसादर३तिभक्तवात्सल्यंदर्शयति अबलाःप्र
ति २४ भोःसाध्वीभवतीनामदर्चितमेवसंकल्पामनोरथःसलज्जयाअष्याभिरकथितोपिमयाविदितः
समयाअनुमोदितः अतःसत्योभवितुमर्हति अर्हतिश्तिसंभावनायाआत्यंतिकोनभविष्यतीतिसू
वित २५ तत्कुतश्त्यतआह नमयीति कामायपुनःकामभोगायविषयमहिम्नाकामस्यापिशो

प्रतिथायस्ववासांसिप्रेष्टसंगमसज्जिताः गृहीतविनुानेचेलस्तस्मिंल्लज्जायितेक्षणाः २३ ना
सोविज्ञायभगवान्स्वपादस्पर्शकाम्यया धृतवृतानांसंकल्पमाहदामोदरोवलाः २४ संक
ल्पोविदितःसाध्वीभवतीनामदर्चनं मयानुमोदितःसोसौसत्योभवितुमर्हति २५ नमय्या
वेशितधियांकामःकामयकल्पतेभर्जिताःक्वथितायानाःप्रायोवीजायनेष्यते २६ यातव
लाव्रजंसिद्धामयेमारंस्यथक्षपाः यदुद्दिश्यव्रतमिदंचेरुरार्याचनेसतीः २७ ॥ रामः

तिहेतत्वादितिभावःकामाश्रोहेहृष्टांतःभर्जिताः दग्धाःक्वथिताःपक्वाःधानायवादिवीजायो
उरोद्भमायनभवतीतिप्रायश्तिस्वल्पापुनःप्ररोहमपिसूचयतिफलवादोनांतथादर्शनात् २६
यानीति सिद्धाःपूर्णमनोरथाः तदाह इमाआगामिनीःशारद्रात्रीःमयारंस्य
थेतिआर्याकात्यायनी सतीसत्या २७ रामः

श्री० भक्त्यावकेप्यकृत्यास्तास्तद्विवर्जितयज्वनां पत्न्यस्त्वग्रहतस्तेषामस्त्वन्कर्ममहामदे २८ २९ ३० विप्रा
भा०द० भार्याणामनुग्रहायपरत्वाटगच्छन् विप्राणांकाठिन्यमभिप्रेत्यतेभ्यस्तद्रुमाः श्रेष्ठाइतितान्नभिनंदति प
सु०टी० श्यतेत्यादिचतुर्भिः ३१ हेस्तोककृष्णादयोगोपाः एतान्द्रुमान्पश्यतपरार्थमेवैकांतेनजीवितंयेषांतान्
८८

श्रीशुकउवाच इत्यादिष्टाभगवतालब्धकामाःकुमारिकाः ध्यायंत्यस्तत्पदांभोजंकृच्छ्रान्नि
विविशुर्व्रजं २८ अथगोपैःपरिवृतोभगवान्देवकीसुतः वृंदावनाद्गतोदूरंचारयन्गाःसहाग्र
जः २९ निदाघार्कातपेतिग्मेछायाभिःस्वाभिरात्मनः आतपत्रायितान्वीक्ष्यद्रुमानाहव्रजौक
सः ३० हेस्तोककृष्णहेअंशोश्रीदामन्सुबलार्जुन विशालवृषभतेजस्विन्देवप्रस्थवरूथप ३१
पश्यतैतान्महाभागान्परार्थैकांतजीविनः वातवर्षातपहिमान्सहंतेवारयंतिनः ३२ अहो
एषांवरंजन्मसर्वप्राण्युपजीवनं सुजनस्येवयेषांवैविमुखायांतिनार्थिनः ३३ पत्रपुष्पफलछा
यामूलवल्कलदारुभिः गंधनिर्यासभस्मास्थितोकमैःकामान्वितन्वते ३४ एतावज्जन्मसाफल्यं
देहिनामिहदेहिषु प्राणैरर्थैर्धियावाचाश्रेयएवाचरेत्सदा ३५ ॥

तदाह वातवर्षादीन्स्वयंसहमानाः अस्माकंवारयंतीति ३२ ३३ सुजनस्यकृपालोरर्थिनइव निर्या ८८
सोयत्नरसः तोकाःपल्लवाग्रअंकुराःपल्लवादिसमूहैः कामान्वितन्वतेअर्थिनइतिशेषः ३४ देहिषुज
न्मसाफल्यमेतावत् कियत्प्राणादिभिः देहिनांश्रेयआचरेत् ३५ ॥

इत्यभिनंदयन् प्रवालादिसमूहैः नचशाखानांनत्राणांमध्यतोयमुनांगतः ग्रामः ३६ ३७ ऊर्मारि
काभ्यः सर्वमेवतत्त्वमोक्षलतया अग्रहीतभोज्यानामेवनिर्गमात् त्वथानीमत्रक्तं ३८ इतिभावार्थे

इतिप्रवालस्तवकफलपुष्पदलोत्करैः तरूणांनम्रशाखानांमध्येनयमुनांगतः
३९ तत्रगाःपाययित्वापःसुमृष्टाःशीतलाःशिवाः ततोनृपस्वयंगोपाःकामंस्वा
दुपपुर्जलं ४० तस्याउपवनेकामंचारयंतःपशून्नृप कृष्णरामावुपागम्यक्षुधा
र्ताइदमब्रुवन् ४१ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्वाविंशोध्यायः २२
श्रीशुकउवाच तत्रागतोपविष्टास्तेगोपालायमुनातटे ऊचुर्बुभुक्षिताराजन्राम
कृष्णौजगत्पती १ गोपाऊचुः रामराममहावीर्यकृष्णदुष्टनिबर्हण एषावै
बाधतेक्षुन्नस्तच्छांतिंकर्तुमर्हथः २ श्रीशुकउवाच इतिविज्ञापितोगोपैर्भग
वान्देवकीसुतः भक्तायाविप्रभार्यायाःप्रसीदन्निदमब्रवीत् ३ श्रीभगवानु
वाच प्रयातदेवयजनंब्राह्मणाब्रह्मवादिनः सत्रमांगिरसंनामह्यास
तेस्वर्गकाम्यया ४ यमाय

दशमेद्वाविंशः २२ त्रयोविंशेतत्रगोपैरन्नयाच्ञापदेशतः तत्पत्न्यनुग्रहात्कृष्णोदीक्षितानन्व
तापयत् १ २ भक्तायाइत्येकवचनंसर्वासांसाधुज्याभिप्रायेण यद्वा जातावेकवचनं ३ ४ ॥

श्री॰ भा॰ द॰ पू॰ टी॰ ८५

देवयजनेय त्तवादं अस्मद्विसर्जिताः आवाभ्यां प्रहिताः सन्तो याचध्वं युष्माकं कातरत्वं लज्जा न च तया पात्रता
दस्माकं किमिति दास्यन्तीति चेत्तत्राह कीर्तयन्त इति अस्मन्नाम्ना युष्माकं पात्रता भविष्यतीति भावः
५ । ६ अविदूरे निकटे देवयजनमार्गे तौ मत्तो वो यदन्नं वलमत्तः अभिलषतः वृत्तौ ओदनं श्रद्धा च यद्यस्ति तर्हि यच्छ
तेति ८ दीक्षितानां वयमभोज्यान्ना इति वदिष्यन्तीति स्वयमेवाशंक्याह दीक्षाया इति दीक्षाया आरम्भाग्नीषो

तत्र गत्वोदनं गोपा याचतास्मद्विसर्जिताः कीर्तयन्तो भगवत आर्यस्य मम चाभिधां ५ इत्यादिष्टा
भगवता गत्वा याचन्त ते तथा कृताञ्जलिपुटा विप्रान्दण्डवत्पतिता भुवि ६ हे भूमिदेवाः शृणुत कृ
ष्णस्यादेशकारिणः प्राप्ताञ्जानीत भद्रं वो गोपान्नो रामचोदितान् ७ गाश्चारयन्तावविदूर ओदनं
रामाच्युतौ वो लषतो बुभुक्षितौ तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च वो यच्छत धर्मवित्तमाः ८ दीक्षा
याः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः अन्यत्र दीक्षितस्यापि नान्नमश्नन्हि दुष्यति ९ इति ते भ
गवद्याच्ञां शृण्वन्तोपि न शुश्रुवुः क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः १० देशः का
लः पृथग्द्रव्यं मन्त्रतन्त्रर्त्विजोग्नयः देवता यजमानश्च क्रतुर्धर्मश्च यन्मय ११ ॥ रामः

मीयपश्वालम्भात्पूर्वं दोषः नत्वनन्तरं सौत्रामण्यामप्यन्यत्र अन्यदा ९ क्षुद्रे तुच्छे स्वर्गादावाशा मा
त्रं येषां ते यद्वा क्षुद्राशाः तुच्छाः करणाः भूरीणि क्लेशाधिकानि कर्माणि येषां ते अतो बालिशाः अ
तो वृद्धमानिन इति मानवन्तः १० नत्तु कर्मक्रमप्रसक्तत्वात् देशकालेऽयोग्यत्वं अन्यसेवा कथं देयं ८५
तत्राह देश इति पृथक्तु चरुपुरोडाशादि द्रव्यं तन्त्रं प्रयोगः धर्मो पूर्वं यन्मयं ११ ॥ रामाय

मनुष्योयमिति दृष्ट्या मर्त्यात्मानो ब्राह्मणा वयं महांत इति मन्यमानाः १२ १३ लौकिकीं गतिमिति नहि
शीर्षेणैनोऽनिर्विद्यते को वा याचकोऽन्यपराभूयतरन्यादि लोकस्थितिं दर्शयन् १४ ज्ञापयत बोधयत केव
लं देहेन गृहे हि वर्त्तंते धियात्मय्येवोषिताः येनाम यि स्निग्धाः अथवा स्निग्धमिति स्निग्धं यसदृशं मन्न

ते ब्रह्म परमं साक्षाद्भगवंतमधोक्षजं मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्मानो न मेनिरे १२ न ते यदो-
मिति प्रोचुर्न नेति च परंतप गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः १३ तदुपाकर्ण्य भ-
गवान् प्रहस्य जगदीश्वरः व्याजहार पुनर्गोपान् दर्शयंल्लौकिकीं गतिं १४ मां ज्ञापयत पत्नी-
भ्यः ससंकर्षणमागतं दास्यंति काममन्नं वः स्निग्धा मय्युषिता धिया १५ गत्वाथ पत्नीशा-
लायां दृष्ट्वासीनाः स्वलंकृताः नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् १६ नमो वो विप्रपत्नी-
भ्यो निबोधत वचांसि नः इतो विदूरे चरता कृष्णेनेहेषिता वयं १७ गाश्चारयन् स गोपालैः सरा-
मो दूरमागतः बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयतां १८ श्रुत्वाच्युतमुपायातं नित्यं तद्द-
र्शनोत्सुकाः तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः १९ चतुर्विधं बहुगुणमन्नमादाय
भाजनैः अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः २० ॥ रामाय

दास्यंति १५ १६ प्रेषिताः प्रेरिताः १७ स कृष्णो गोपालैः सह १८ तत्कथाक्षिप्तमनस्त्वात् तद्दर्शनो-
त्सुकाः श्रुत एव तदुपागतं श्रुत्वा जातसंभ्रमा बभूवुरिति १९ भक्ष्यभोज्यलेह्यचोष्यभेदैः चतुर्विधं
बहुगुणां संस्कारविशेषैः बहवो गुणा रसा सौरभ्यादयो यस्मिंस्तत् भाजनैरमत्रैर्भांडैर्वा २० ॥

श्री॰
भा॰ द॰
पू॰ टी॰
९०

पत्यादिभिर्वार्यमाणा अपि प्रिये श्रीकृष्णमभिसस्रुरभिजग्मुः अप्रतिवर्ये ह्युष्टांतः समुद्रं निम्नगा इवे
ति अत्र हेतुर्भगवतीति २१ दीर्घं बहुकालं श्रुतेन श्रवणेन धृत आशयो याभिस्ताः २२ तत्र आगताः
स्त्रियः तं ददृशुः २३ हिरण्यवत्परिधिः परिधानं यस्य तं पीतांबरधारिणमित्यर्थः वनमाल्यैर्बर्हैर्धातु
भिः प्रवालैश्च नटवद्वेशो यस्य तं अनुव्रतस्य सख्युः अंसे विन्यस्तो निहितो हस्तो येन तं इतरेण हस्तेन
लीलया अब्जं धुनानं भ्रामयंतं कर्णयोरुत्पले यस्य तं अलकाः कपोलयोर्यस्य मुखाब्जं हासो यस्य

निषिध्यमानाः पतिभिर्भ्रातृभिर्बंधुभिः सुतैः भगवत्युत्तमश्लोके दीर्घश्रुतधृता
शयाः २२ यमुनोपवनेऽशोकनवपल्लवमंडिते विचरंतं वृतं गोपैः साग्रजं ददृशुः
स्त्रियः २३ श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेशमनुव्रतांसे
विन्यस्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासं २४ प्रा
यः श्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरंध्रैः अंतः प्रवेश्य
सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेंद्र २५ ॥ रामायनमः

तं च तं च तं च २४ वृत्तेरपि लयेन सामरस्यमाह प्राय इति बहुशः श्रुता ये प्रियतमस्योदया उत्क
र्षाः त एव कर्णपूराः कर्णालंकाराः यं निकृत्नार्थीकुर्वतीति तथा नेकर्णाभरणैरिति यस्मिन् श्रीकृष्णे
निमग्नमनसः आविष्टचेतसः तं लोचनद्वारैरंतः प्रवेश्य सुचिरं परिरभ्य तापं अहंकारं यथाभिमता
योऽहंमतयः प्राज्ञं सुषुप्त्यभिमानिनं परिरभ्य तामसीं वृत्तिं प्राप्य २५ ॥ रामः ९०

अविरलहृद्द्रष्टासर्वेषुद्विजादीनांतत्याशामाविज्ञायापितथेत्येतद्विवृणोति त्यक्तसर्वाशाः त्यक्ताःसर्वा
आशायाभिस्ताःकेवलमात्मनःस्वस्यैवदिदृक्षयेति २६ हेमहाभागाःवःस्वागतंशुभागमनं २६ नदेवाह
यद्यस्मात्प्रतिवेधतिरस्कारेणास्माकंदिदृक्षयाप्राप्ताइति३देवउपपन्नंसंपन्नंयुक्तमितिवा २७ युक्तत्वमाह नन्वि
ति आत्मप्रियेआत्मात्वंप्रियत्वंतस्मिन्मयिकुशलाविवेकिनः अतएवस्वस्यात्मनोर्थंपश्यंतियेतेयथावद्भक्तिंकु
र्वंति यथात्वमेवाह अहैतुकीत्वादन्नहेतुः अहैतुकव्यवहिताफलाभिसंधिरहितांअतएवाव्यवहितांनिरंतरा
नास्तत्यागात्यक्तसर्वाशाःप्राप्ताआत्मदिदृक्षया विज्ञायाखिलदृग्द्रष्टाप्राहप्रहसिताननः २५ स्वाग
तंवोमहाभागाआस्यतांकरवामकिं यन्नोदिदृक्षयाप्राप्ताउपपन्नमिदंहिवः २६ नन्वद्धामयिकु
र्वंतिकुशलाःस्वार्थदर्शिनः अहैतुक्यव्यवहितांभक्तिमात्मप्रियेयथा २७ प्राणबुद्धिमनःस्वात्म
दारापत्यधनादयः यत्संपर्कात्प्रियाआसंस्ततःकोन्वपरःप्रियः २८ तद्यातदेवयजनंपतयोवोद्विजा
तयः स्वसत्रंपारयिष्यंतियुष्माभिर्गृहमेधिनः द्विजपत्न्यः नैवंवचोर्हतिभवान्वदितुंनृशंसंसत्यंकु
रुष्वनिगमंतवपादमूलं प्राप्तावयंतुलसिदामपदावसृष्टंकेशैर्निवोढुमतिलंघ्यसमस्तबंधून् ३०
२८ आत्मनःसर्वतःश्रेष्ठत्वमुपपादयति प्राणेति स्वात्मानयःआत्मादेहः एतेसर्वेयत्संपर्काद्यस्या
ध्यासेनोपकारणत्वेनवा २९ नन्वस्मात्कृतार्थायूयंयातदेवयजनेयज्ञवाटंगच्छत नच कृतार्थाः
किमितिपास्यामइतिचेत्तत्राह पतयइति पारयिष्यंतिसमापयिष्यंतिपतीनामत्रग्रहायसमर्थाः
२९ नृशंसंपरुषं निगमंप्रतिज्ञां नमेभक्तःप्रणश्यतीतिनिगमंवेदंवानसत्यनरावर्तनेइति
पदावसृष्टमवज्ञयापिदत्तंबहुमानेनकेशैर्निवोढुंदासीभवितुं ३० ॥

श्री॰ भा॰द॰ सु॰टी॰ ५१

किंचनोस्मान्नगृह्णंति हेअरिंदमकामलोभादिशमनभवतः पादाग्रयोः निपतितदेहानामन्यास्व
र्गादिगतिरपिनभवेत् माभून्नामतस्मात्दास्यमेवविधेहीति ३२ मयाउपेताः अनुज्ञाताः प्रत्यवेत
देवान्यदर्शनाद् देवाअपीति ३३ तथापित्वांत्यक्त्वानशक्नुमइतिचेत् तत्राह नेति ३४ प्रीतये

गृह्णंतिनोनपतयः पितरौसुतावानभ्रातृबंधुसुहृदः कुतएवचान्ये तस्माद्भवत्प्रपदयोः
पतितात्मनांनोनान्याभवेद्गतिररिंदमतद्विधेहि ३२ श्रीभगवानुवाच पतयोनाभ्यसूये
रन्पितृभ्रातृसुतादयः लोकाश्चवोमयोपेतादेवाअप्यनुमन्वते ३३ नप्रीतयेनुरागा
यह्यंगसंगोनृणामिह तन्मनोमयियुंजानाअचिरान्मामवाप्स्यथ ३४ श्रवणाद्दर्श
नाद्ध्यानान्मयिभावोनुकीर्तनात् नतथासन्निकर्षेणप्रतियाततनोगृहान् ३५
श्रीशुकउवाच इत्युक्ताद्विजपत्न्यस्तायज्ञवाटंपुनर्गताः तेचानसूयवः स्वाभिः
स्त्रीभिः सत्रमपारयन् ३६ तत्रैकाविधृताभर्त्राभगवंतंयथाश्रुतं हृदोपगुह्यवि
जहौदेहंकर्मानुबंधनं ३७ ॥ रामायनमः

सुखायअनुरागायस्नेहवृद्धयेअंगसंगः अंगानांसंगः शरीरसंपर्कः तस्माद्गृहेस्थिताः ध्यानरूपेण ५१
मामेवसेवध्वमितिभावः ३५ अनसूयवः अदोषदृष्टयः सत्रंयज्ञंसमपारयन्समाप्तिंचक्रुः ३६ तत्रैका
द्विजपत्नीभर्त्राविधृतावनितादेहंतंचैवविहायध्यानेनभगवंतंप्राप्तेत्यर्थः ३७ ॥

३८ अनुशीलयन् अनुकुर्वन् गोगोपीनामिति कर्मणि षष्ठी रूपवाक्कृतैः रूपेण वाचा कृतैः अशितैः अनु
मयन् तान् रमयितुं रेमे इत्यर्थः ३९ अनुस्मृतिप्रकारमाह त्वद्विडंबनयोर्न तत्र करणवृत्ताः किं स्विदीश्वरयोः
याञ्चायत महन्म हतैवतः नत्कृतागसो वयमिति अनुस्मृत्येति ४० नदास्वभार्याः गुरूनिवमानय
तो भगवद्भक्तिरहितमात्मानं व्यनिंदन्नित्याह दृष्ट्वेति अलौकिकीं लोकातीतां ४१ त्रिवृच्छौक्लं सावि

भगवान् यो गोविंदः तेनैवान्नेन गोपकान् चतुर्विधेनाशयित्वा स्वयं च बुभुजे प्रभुः ३८ एवं ली
लानरवपुः नृलोकमनुशीलयन् रेमे गोगोपगोपीनां रमयन् रूपवाक्कृतैः ३९ अथानुस्मृत्य
पी ३ विप्रास्ते अन्वतप्यन् कृतागसः यद्विश्वेश्वरयोर्याञ्चामहन्म नृविडंबयोः ४० दृष्ट्वा स्त्रीणां भगवति कृ
ष्णे भक्तिमलौकिकीं आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ४१ विप्राः धिगस्माकं त्रिवृज्ज
न्म धिग्व्रतं धिग्बहुज्ञतां धिक्कुलं धिक्क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ४२ नूनं भगवतो
माया योगिनामपि मोहिनी यद्वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ४३ अहो पश्यत ना
रीणामपि कृष्णे जगद्गुरौ दुरंतभावं योऽविध्यन्मृत्युपाशान् गृहाभिधान् ४४ ॥ रामा

त्रैदैह्यमिति त्रिगुणितं जन्म व्रतं ब्रह्मचर्यं क्रियाः कर्माणि दाक्ष्यं च क्रियादाक्ष्यमित्येकं वा पदं धिगि
ति अपि ये त्वेव यमधोक्षजे विमुखाः तेषां जन्मादि तत्सर्वं धिग्धिगिति व्यगर्हयन्नित्यर्थः ४२ स्वार्थे
हरिभक्तौ ४३ योऽविध्यत् अच्छिनत् तत्तत्र दुरंतभावं भक्तिं वं भक्तिं पश्यतेति ४४ ॥

श्री॰
भा॰ द॰
टी॰
९२

द्विजातिसंस्कारः उपनयनेन क्रियाः संध्योपासनाद्याः आत्ममीमांसा आत्मविचारः ४५ ४६ अहो कष्टं भ-
गवता कारुण्यसागरेण प्रबोधिता अपि न बुध्यामहे इत्याह नूनमिति ४७ ननु सकृत्स्मरार्थी गोपान्प्रस्था-
पयामास नोऽस्मान्स्मारयितुमिति चेत् तत्राह अन्यथेति ४८ स्वात्मदोषापवर्गेण चाञ्चल्यगर्वा-

नासां द्विजातिसंस्कारो न निवासो गुरावपि न तपो नात्ममीमांसा न शौचं न क्रियाः शुभाः ४५
अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे भक्तिर्दृढा न चास्माकं संस्कारादिवतामपि ४६ न-
नु स्वार्थविमूढानां प्रमत्तानां गृहेहया अहो नः स्मारयामास गोपवाक्यैः सतां गतिः ४७ अन्य-
था पूर्णकामस्य कैवल्याद्याशिषां पतेः ईशितव्यैः किमस्माभिरीशस्यैतद्विडम्बनं ४८ हित्वा-
न्यान्भजते यं श्रीः पादस्पर्शाशयासकृत् स्वात्मदोषापवर्गेण तद्याच्ञा जनमोहिनी ४९ दे-
शः कालः पृथग्द्रव्यं मन्त्रतन्त्रर्त्विजोऽग्नयः देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ५० स एव
भगवान्विष्णुः साक्षाद्योगेश्वरेश्वरः जातो यदुष्वित्याशृण्म ह्यपि मूढा न विद्महे ५१ अहो व-
यं धन्यतमा येषां नस्तादृशीः स्त्रियः भक्त्या यासां मतिर्जाता अस्माकं निश्चला हरौ ५२ नमस्तुभ्यं
भगवते कृष्णायाकुण्ठमेधसे यन्मायामोहितधियो भ्रमामः कर्मवर्त्मसु ५३ स वै न आद्यः पुरुषः
स्वमायामोहितात्मनां अविज्ञातानुभावानां क्षन्तुमर्हत्यतिक्रमं ५४ इति स्वाघमनुस्मृत्य कृष्णे ते कृ-
तहेलनाः दिदृक्षवोऽपि ते विप्राः कंसात्भीता न चाचलन् ५५ इति श्रीभागवते दशमे त्रयोविं- शः २३ ॥

दित्यागेन ४९ ५० इत्यस्माननपेक्ष सर्वज्ञः कृतवेतावश्यं द्वितयापीति ५१ ५४ नचाचलन् तयोर्दर्शना-
यन्तजग्मुः ब्राह्मणाः कंसाद्भीताः स्वाश्रमस्था एव भगवन्तमभजन्नित्यर्थः ५५ इति भावार्थदीपिकायां दशमे त्रयो-

विंशः २३ ॥
९२

चतुर्विंशेमहेंद्रस्यमखंव्याहन्ययुक्तिभिः कृष्णःप्रवर्त्तयामासगोवर्द्धनमखोत्सवं भूसुराणांक्रियागवें
निरस्यस्वःस्त्रोषुच मघवन्मदभंगायतन्मखंसन्यवारयत् ब्राह्मणाःकंसप्रज्ञीताःस्वाश्रमस्थापवभगव
न्तमभजन् भगवानपितत्रैवनिवसन् इंद्रयागकृतोद्यमानोपानपश्यदितिसंबंधः २ कोयंसंभ्रमो
येनभवतिमोवायमितिपर्यवेत् किमत्रफलंकादेवताकेनाधिकारिणाकेनवासाधनेनसाध्यते ३ ए
तत्त्वहिमहान्कामोममश्रवणावर्जते यद्वा नवमहान्कामोहृश्यतेश्रितत्सीस्थितंस्मादनेति

श्रीशुकउवाच भगवानपितत्रैवबलदेवेनसंयुतः अपश्यन्निवसन्गोपानिंद्रयागकृतोद्यमा
न् १ तदभिज्ञोपिभगवान्सर्वात्मासर्वदर्शनः प्रश्रयावनतोपृच्छद्वृद्धान्नंदपुरोगमान् २ श्रीभ
गवानुवाच कथ्यतांमेपितःकोयंसंभ्रमोवउपागतः किंफलंकस्यवोद्देशःकेनवासाध्यतेम
खः ३ एतद्ब्रूहिमहान्कामोमह्यंशुश्रूषवेपितः नहिगोप्यंहिसाधूनांकृत्यंसर्वात्मनामिह ४
अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषां उदासीनोरिवद्वर्ज्यःस्वात्मवत्सुहृदुच्यते ५ ॥

सर्वात्मनांसर्वज्ञात्मदृष्टीनां ४ अतएवनविद्यतेस्वःपरइतिदृष्टीर्येषांपरइतिदृष्ट्यभावादेवतद्वे
दामित्रादयोपियेषांनसंतीत्याह अमित्रेति नमित्रंउदास्तउदासीनः विद्विट्येषांतेषांकृत्यंसर्वं
कर्म्मनगोपनीयंकिंचिदस्तीत्यर्थः सत्यपिभेददर्शनेउदासीनःशत्रुवद्वर्ज्यः आत्मवत्सुहृत्त्वान्सुहृत्स
त्वेषुनवर्जनीयइत्याह उदासीनइति किंच सुहृद्भिःसहविचार्य्यज्ञात्वैवकर्म्मकर्त्तव्यंनत्वगत्यागति

श्री. भा. द. स्कं. टी. ९३

ज्ञात्वा अज्ञात्वा वा तत्र विदुषो यथा तत्कर्मफलं स्यात्तथा नाविदुषः ६ भवतामयं क्रियायोगः शास्त्रतो किं विचारितः अथवा लौकिक आचार एवेति साधूपपत्तिकं भण्यतां कथ्यतामिति ७ आचार एवमेवेति सहेतुकमाह पर्जन्य इति आत्ममूर्तयः प्रियामूर्तयः ततः किमत आह तमिति तमिंद्रं वा सर्वोमेघा नानोत्तदेन सात्वोष्टिपयसा ८ उपजीवंति जीविकां कल्पयंति त्रिवर्गफलहेतवे

ज्ञात्वाज्ञात्वा च कर्माणि जनोयमनुतिष्ठति विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत्
६ तत्र तावत्क्रियायोगो भवतां किं विचारितः अथवा लौकिकस्तन्मे पृच्छतः साधु भण्य
तां ७ नंद उवाच पर्जन्यो भगवानिंद्रो मेघास्तस्यात्ममूर्तयः ते भिवर्षंति भूतानां प्रीण
नं जीवनं पयः ८ तं तात वयमन्ये च वार्मुचां पतिमीश्वरं द्रव्यैस्तद्रेतसा सिद्धैर्यजंते क्रतुभि
र्नराः ९ उच्छेषेणोपजीवंति त्रिवर्गफलहेतवे पुंसां पुरुषकाराणां पर्जन्यः फलभावनः
१० य एनं विसृजेद्धर्मं परंपर्यागतं नरः कामाल्लोभाद्भयाद्द्वेषात्स वै नाप्नोति शोभनम् ११
श्रीशुक उवाच वचो निशम्य नंदस्य तथान्येषां व्रजौकसां इन्द्राय मन्युं जनयन्पितरं प्राह
केशवः १२ ॥

धर्मार्थकामसिद्धये नन्वन्यो कृष्या दिभिर्जीवंते किमिंद्रेण तत्राह पुंसामिति फ
लभावनः फलसाधकः पर्जन्यं विना कृष्यादिवैफल्यादित्यर्थः १० इंद्राय मन्युं जनयन्निति को ९३
पजननद्वारा गोवर्धनादिद्रूमवतारयितुं देवतानिराकरणं न त्वयमेवाभिप्रायः इत्यर्थः १२ ॥

प्रथमं तावत्कर्मवादेन देवान्निराकरोति कर्मणेति ननु जन्तोः कर्मणः केवलात्कथं फलसिद्धिः स्यात्
इति चेत् अहो अपरिशीलितमीमांसानां स्वमतिविलसितं अदृष्टाकर्मणः फलकारणत्ववचनतो वगतं किं त
तो नुपपन्नं नाम १३ केचित्तु नरा ईश्वरभीताः कर्मपरतन्त्रमीश्वरं मन्यन्ते तन्मतमनूद्य निराकरोति अ
स्ति चेदिति स्वयं कर्मनिरपेक्षो ऽन्येषां जीवानां कर्मणां फलरूपी फलदाता कर्तारमेव भजते न त्वकर्मफलदा
नेन १४ अतः कर्मण एव फलसिद्धेः तत्परतन्त्रेश्वरेण अजागलस्तनतुल्यत्वात् न स्वतन्त्रयाकृतमित्याह किं

श्रीभगवानुवाच कर्मणा जायते जन्तुः कर्मणैव विलीयते सुखं दुःखं भयं क्षेमं कर्मणैवाभिप
द्यते १३ अस्ति चेदीश्वरः कश्चित्फलरूप्यन्यकर्मणाम् कर्तारं भजते सोपि न ह्यकर्तुः प्रभुर्हि सः
१४ किमिन्द्रेणेह भूतानां स्वस्वकर्मानुवर्तिनां अनीशेनान्यथा कर्तुं स्वभावविहितं नृणां १५
स्वभावतन्त्रो हि जनः स्वभावमनुवर्तते स्वभावस्थमिदं सर्वं सदेवासुरमानुषं १६ देहानुच्चा।
वचान्जन्तुः प्राप्योत्सृजति कर्मणा शत्रुर्मित्रमुदासीनः कर्मैव गुरुरीश्वरः १७ ॥ राम

मिन्द्रेणेति ननु कर्मणोपि प्रवृत्तिरन्तर्याम्यपेक्ष्यैव कथं सर्वथा देवताया अनुपयोग इत्याशंक्याह
स्वभावविहितमिति स्वभावेन प्राक्तनसंस्कारेण विहितं यत्कर्म तदन्यथा कर्तुमनीशेन १५
एतद्विवृणोति स्वभावतन्त्र इति प्रवृत्तेः संस्काराधीनत्वात् किमन्तर्यामिरूपेणेत्यर्थः १६ तस्मा
त्स्वभावतो निष्पन्नस्य कर्मण एव सर्वकारणत्वात्कर्मैव पूज्यमित्याह देहानिति सार्द्धैः १७ ॥

श्री॰ शत्रुमित्रादिकमपिकर्मणैवायतः एवंशत्रुः पश्चान्मित्रंदृश्यते मित्रमपिउदासीनः एवंअथ्यानिय
भा॰ द॰ मः निमित्तंकर्मैवसंपूजयेत्संमानयेत् नतुदेवतोद्देशेनद्रव्यत्यागात्मकत्वात्कर्मणः कथंदेवतांविना
पू॰ टी॰ सिद्धिरित्याशंक्याकर्मणामात्रेदेवत्वेतिपक्षमुपसंहरति हृतत्वादुमाश्रित्याभ्यामेवदेवतासमर्थ्यते अ
९४ जसेति १८ देवत्वेनैवविपक्षेदोषमाह आजीव्येति उपजीवतिसेवते १९ स्ववृत्तिवर्णकदृष्टान्तेन

तस्मात्संपूजयेत्कर्मस्वभावस्थः स्वकर्मकृत् अंजसायेनवर्तेततदेवास्यहिदैवतं १८ ।
आजीव्यैकतरंभावंयस्त्वन्यमुपजीवति नतस्माद्विंदतेक्षेमंजारान्नार्यसतीयथा १९ वर्तेत
ब्रह्मणाविप्रोराजन्योरक्षयाभुवः वैश्यस्तुवार्तयाजीवेच्छूद्रस्तुद्विजसेवया २० कृषिवाणि
ज्यगोरक्षाकुसीदंतुर्यमुच्यते वार्ताचतुर्विधातत्रवयंगोवृत्तयोनिशं २१ सत्वंरजस्तमइति
स्थित्युत्पत्त्यंतहेतवः रजसोत्पद्यतेविश्वमन्योन्यंविविधंजगत् २२ रजसाचोदितामेघावा
र्षंत्यंबूनिसर्वतः प्रजास्तैरेवसिध्यंतिमहेंद्रः किंकरिष्यति २३ ॥ नवर्णानांवृत्तिभेदमाह

वर्तेतेति ब्रह्मणावेदाध्यापनादिना २० वैश्यवृत्तेः चातुर्विध्यमाह कृषीति कृषिवाणिज्यमुक्ति
तागोरक्षाएवंत्रयंकुसीदंवृद्धिजीवनंतत्तुर्यंचतुर्थं २१ ननुगवामपिवृत्तिर्महेंद्राधीनैवेत्याशंक्य निरी ९४
श्वरसांख्यमताश्रयेणाह निराकरोति सत्वमिति श्लोकद्वयेन अन्योन्यंस्त्रीपुरुषयोगेन २२ सर्वतः सर्वदे
शेलोष्टकादिष्वपिवृष्टिदर्शनात्प्रेक्षावत्पूर्वकत्वंनास्तीतिभावः तैरेवमेघैः सिध्यंति जीवंति २३

तथापि योगक्षेमार्थं देवतायेवेति चेत् अत आह न नः पुर इति पुरः पत्तनानि जनपदा देशाः अस्माकं यो
गक्षेमहेतवो वा वनशैलादय एवेति भावः २४ ब्राह्मणानपि संग्रहन्नन्निगमयति तस्मादिति स्वयमुत्प्रेक्ष्य ता
यागकल्पनामाह य इन्द्रमखसंभारा इति सार्द्धैः पंचभिः संभाराः साधनानि २५ सूपान्ता मुद्गपायसं केवले
पयसि पक्वं संयावा दधिगोधूमादिविक्रियाः क्रमश्च सूपपायसयोः कृत्वा दोहस्सायेतः अन्येषां या

न नः पुरो जनपदा न ग्रामा न गृहा वयं वनौकसस्तात नित्यं वनशैलनिवासिनः २४ तस्माद्ग
वां ब्राह्मणानां अद्रेश्चारभ्यतां मखः य इन्द्रयागसंभारास्तैरयं साध्यतां मखः २५ पच्यंतां विविधाः
पाकाः सूपांताः पायसादयः संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यतां २६ हूयंतामग्नयः सम्यग्ब्रा
ह्मणैर्ब्रह्मवादिभिः अन्नं बहुगुणं तेभ्यो देयं वो धेनुदक्षिणाः २७ अन्येभ्यश्चाश्वचांडालपतितेभ्यो
यथार्हतः यवसं च गवां दत्वा गिरये दीयतां बलिः २८ स्वलंकृता भुक्तवंतः स्वनुलिप्ताः सुवा
ससः प्रदक्षिणं च कुरुत गोविप्रानलपर्वतान् २९ एतन्मम मतं तात क्रियतां यदि रोचते अ
यं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ३० श्रीशुक उवाच कालात्मना भगवता शक्रदर्प
जिघांसया प्रोक्तं निशम्य नंदाद्याः साध्वगृह्णंत तद्वचः ३१ ॥ वतः २६ यागशोभार्थं अश्वहोत्या
दनार्थं चाह हूयन्तामिति येत्र दक्षिणाः येत्र सहिताः दक्षिणा तापवचा दक्षिणाः वो युष्माभिः १४
२७ यवसं तृणं बलिर्नैवेद्यं २८ २९ सर्वांश्च शिरःकंपेनानुमोदयन्नाह गोब्राह्मणाद्रीणां मह्यं मम

श्री. तद्द्रव्येणतेनमहेंद्रसाधनद्रव्येणगिरिंद्विजांश्चेतियथायथं ३२ बलीनुपहृत्यदत्वाआदृताःसादराः
भा.द. ३३ अनडुद्युक्तानिउत्तमवृषयुक्तानिसद्विजाशिषः द्विजाशीर्भिःसहिताः ३४ गोपविश्रंभणंगो
भू.टी. पानांविश्वासजनकंरूपंगतः शैलःसन्बलिमुपहारमादत् अभक्षयत् ३५ तस्मैआत्मनेआत्मा
९५ नास्वयंव्रजजनैःसहनमःचक्रे अहोइतिसार्द्धश्लोकंपठन् ३६ कामरूपीसर्वादिरूपः अस्मैअद्र

तथाचव्यदधुःसर्वंयथाहमधुसूदनः वाचयित्वास्वस्त्ययनंतद्द्रव्येणगिरिद्विजान् ३१ उप
हृत्यबलीन्सर्वानादृतायवसंगवां गोधनानिपुरस्कृत्यगिरिंचक्रुःप्रदक्षिणं ३२ अनांस्य
नडुद्युक्तानितेआरुह्यस्वलंकृताः गोप्यश्चकृष्णवीर्याणिगायंत्यःसद्विजाशिषः ३४ कृ
ष्णस्त्वन्यतमंरूपंगोपविश्रंभणंगतः शैलोस्मीतिब्रुवन्भूरिबलिमादद्बृहद्वपुः ३५ तस्मै
नमोव्रजजनैःसहचक्रेत्मनात्मने अहोपश्यतशैलोसौरूपीनोनुग्रहंव्यधात् ३६ एषोव
जानतोमर्त्यान्कामरूपीवनौकसः हंतिह्यस्मैनमस्यामःशर्मणेआत्मनोगवां ३७ इत्यद्रि
गोद्विजमखंवासुदेवप्रणोदिताः यथाविधायतेगोपाःसहकृष्णाव्रजंययुः ३८ इतिश्री
भागवतेमहापुराणेदशमस्कंधेचतुर्विंशोध्यायः २४ ॥

येशर्मणेक्षेमाय ३७ कर्मैवालंप्राकृतभावोगुणोवाकर्मणांवानदृशोवामहेशः वार्चीकर्त्री ९५
देवतेतीयमस्मात्देवताभेदेनमतोनतत्वभोप्सा ३८ इतिभावार्थदीपिकायांदशमेचतुर्विंशः २४

पंचविंशे रुषा शक्रे व्रजनाशाय वर्षति उद्धृत्य गिरिमासाराद्ररक्षगोकुलं प्रभुः कृष्णोनाथो येषां तेभ्यः १
क्रुद्धस्सन् इंद्रः सांवर्तकं नाम संवर्तः प्रलयः तत्कर्तारं मेघानां गणं प्राचोदयत प्रेषयामास न
नु कथं कृष्णनाथानां चातिप्रवृत्त इत्याशंक्य आत्मसंभावनया निरस्तविवेकत्वादित्याशयेनाह वा
क्यं चाहेत्यादि पंचभिः ईशमानी अहमेव ईश्वर इति गर्ववान् २ देवहेलनं देवस्य ममावज्ञा ३ य
दृढैरसमर्थैः कर्ममयैः क्रियानिर्वर्त्यैः अतएव नामनौनिभैः नाममात्रेण यानौ इति व्यवच्छिद्य

श्रीशुक उवाच इंद्रस्तदात्मनः पूजां विज्ञाय विहतां नृप गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्य
श्चुकोप सः १ गणं सांवर्तकं नाम मेघानां चांतकारिणां इंद्रः प्राचोदयत्क्रुद्धो वाक्यं चाहेशमानि
न २ अहो श्रीमदमाहात्म्यं गोपानां काननौकसां कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनं ३
यथादृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः विद्यामान्वीक्षिकीं हित्वा तितीर्षंति भवार्णवं ४
वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनं कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियं ५ ॥

ते तर्तुमीशाः आन्वीक्षिकीमात्मानात्मनिरूपणं ४ तया वाचालं बहुभाषिणं बालिशं शिशुं अतः स्तब्धं
पंडितमानिनं पंडितंमन्यं अतः स्तब्धमविनीतमिति निंदापर्यायोक्तिः वाग्मी दस्याभारती श्रीकृष्णस्तोत्रानि ता
स्याद्धि वाचालं मशह्ययोनिं बालिशमेवमपि शिशुवन्निरभिमानं स्तब्धमन्यस्य वन्द्यस्याभावादनमं अज्ञं तेना
स्थितोपस्मातसर्वज्ञमित्यर्थः पंडितमानिनं ब्रह्मविदो बहुमाननीयं कृष्णं सदानंदरूपं परब्रह्म मर्त्यं तथा

विमन्यमानासन्तेनमनुत्वापप्रियमानमिति ५ ॥

श्री. भा. द. स्कं. ५६

अवलिप्तानां मत्तानां आध्मापितात्मनां बृंहितदेहानां धुनुत अपनयत श्रीमदेन यः स्तंभो गर्वस्तं ६
विभ्यतस्तान्सेचान्सत्याहु अहं चेति अनुव्रजे अनंतरमेवागमिष्यामि मरुद्गणैर्देवगणैः सह ७ म
घवताज्ञप्ता इंद्रेणाज्ञप्ता निर्मुक्तं बंधनं येषां ते प्रलयाभिप्रायेण बद्धा आसन् तदा निर्मुक्तबंधनाः सन्तः आसारैः धारा
संपातैः गोकुलं पीडयामासुः ८ स्तनयित्नुभिः नदंतः गर्जंतः मरुद्गणैः वायुप्रवाहादिवायुसमू

एषां श्रियावलिप्तानां कृष्णेनाध्मापितात्मनां धुनुत श्रीमदस्तंभं पशून्नयत संक्षयं ६
अहं चैरावतं नागमारुह्यानुव्रजे व्रजं मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ७ श्रीशु
क उवाच इत्थं मघवताज्ञप्ता मेघा निर्मुक्तबंधनाः नंदगोकुलमासारैः पीडयामासुरो
जसा ८ विद्योतमाना विद्युद्भिः नदंतः स्तनयित्नुभिः तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलश
र्कराः ९ स्थूणास्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः जलौघैः प्लाव्यमाना भूर्नादृश्य
त नतोन्नतं १० अत्यासारातिवातेन पशवो जातवेपनाः गोपा गोप्यश्च शीतार्ता गोविंदं शर
णं ययुः ११ शिरः सुतांश्च कायेन प्रच्छाद्यासारपीडिताः वेपमाना भगवतः पादमूलमुपा
ययुः १२

हैः नुन्नाः प्रेरिताः जलशर्कराः जलोपलान् ९ स्थूणावत्स्थूला अभ्रे
षु मुंचत्सु सत्सु नतोन्नतं निम्नमुन्नतं नहिपरीतं यथा भवति तथा भूर्नापश्यत १० जातवे
पना जातकंपाः ११ तत्र पशूनां पाने विशिनष्टि शिर इति १२ रामाय ॥ ५६

गोपगोपीनां शरणीनामाह कृष्णकृष्णेति त्वमेवनाथोयस्यतद्गोकुलंगवांकुलंवंशंनः अस्माकंदेवादिं
द्राद्धातुमर्हसि १३ विज्ञापनात्सर्वमेवकुपितेनेन्द्रेणकृतंतद्वर्षमेने १४ कथंमेने तदाह अप
र्त्विति अपगतऋतुर्वर्षस्ततद्वर्षणं अतिशयितोवातोयस्मिंस्ततदतिवातंशिलामयञ्च १५ तत्रप्रतिसाह
वंगोवर्द्धनोद्धरणमाह तत्रेति प्रतिविधिंप्रतीकारंसम्यगात्मयोगेनसाधयिष्यामितेनचमौढ्याल्लोकेशमा

कृष्णकृष्णमहाभागत्वन्नाथंगोकुलंप्रभोः त्रातुमर्हसिदेवान्नःकुपिताद्भक्तवत्सल १३ शि
लावर्षनिपातेनहन्यमानमचेतनं निरीक्ष्यभगवान्मेनेकुपितेंद्रकृतंहरिः १४ अपर्त्वत्युल्बणंव
र्षमतिवातंशिलामयं स्वयागेविहतेस्माभिरिंद्रोनाशायवर्षति १५ तत्रप्रतिविधिंसम्यगात्मयो
गेनसाधये लोकेशमानिनांमौढ्याद्धरिष्येश्रीमदंतमः १६ नहिसद्भावयुक्तानांसुराणामीशवि
स्मयः मत्तोसतांमानभंगःप्रशमायोपकल्पते १७ तस्मान्मच्छरणंगोष्ठंमन्नाथंमत्परिग्रहं
गोपायेस्वात्मयोगेनसोयंमेव्रतआहितः इत्युक्त्वैकेनहस्तेनकृत्वागोवर्द्धनाचलं दधारलील
याकृष्णः छत्राकमिवबालकः १९ ॥

निनांश्रीमदन्वत्वाणंतमोहरिष्यामिवड्रवचनेनवरुणादीनभिप्रेति १६ तत्रदेवाःसात्विकास्तन्न
कास्मात्कुतस्तेषांतमस्तत्राह नहीति सद्भावः सत्वमद्भक्तिर्वातद्युक्तानांसुराणांईशावयमितिवि
स्मयोगर्वोयस्मात्तद्वदंतेअतत्रअसतस्ते किंचतेषांमानभंगोः उपद्रवएवतत्राह मत्तइति १७ १८ गोपा
येरक्षयिष्यामि किंच सोयंममव्रतोनियमः संकल्पोआहितःधृतइत्यर्थः १९ छत्त्राउत्कसच्छत्रा

कं भ० टीका ५ ॥

यथोपजोषं यथासुखं २० २१ सव्रजाः शकटमंडलीसहिताः सोपजीविनः भृत्यपुरोहितादिस
हिताः यथावकाशमसंकोचेन स्थिताः २२ पदात्स्थानात्सप्तदिनानि यावत् २३ २४ २५ व्युदप्रा

अथाह भगवान्गोपान्हेऽम्ब तात व्रजौकसः यथोपजोषं विशत गिरिगर्तं सगोधनाः २०
न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातने वातवर्षभयेनालं तत्त्राणं विहितं मया २१ तथा नि
र्विविशुर्गर्तं कृष्णाश्वासितमानसाः यथावकाशं सधनाः सव्रजाः सोपजीविनः २२ क्षुत्तृ
ड्व्यथां सुखापेक्षां हित्वा तैर्व्रजवासिभिः वीक्ष्यमाणो दधाराद्रिं सप्ताहं नाचलत्पदात् २३
कृष्णयोगानुभावं तं निशाम्येन्द्रोऽतिविस्मितः निःस्तम्भो भ्रष्टसंकल्पः स्वान्मेघान्संन्य
वारयत् २४ खं व्यभ्रमुदितादित्यं वातवर्षं च दारुणं निशाम्योपरतं गोपान्गोवर्धनध
रोऽब्रवीत् २५ निर्यात त्यजत त्रासं गोपाः सस्त्रीधनार्भकाः उपारतं वातवर्षं व्युदप्रा
याश्च निम्नगाः २६ ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय गोधनं शकटोढोपकरणं
स्त्रीबालस्थविराः शनैः २७ भगवानपि तं शैलं स्वस्थाने पूर्ववत्प्रभुः पश्यतां स
र्वभूतानां स्थापयामास लीलया २८ ॥

याः विगतोदकप्रायाः स्वल्पजला जाता नद्यः २६ शकटोढोपकरणं शकटैरूढमुपकर
णं परिकरं भांडादिकं यथा भवति तथा गोधनमादाय शनैर्निर्ययुः २७ २८

निभृताः सर्वे यथावयो विततं परिरंभणादिभिः समीयुः उपजग्मुः सदाशिषः श्रेष्ठा नादाशीर्वादान् २९
३० ३१ ३२ ततो गोवर्द्धनस्थानात् अस्य श्रीकृष्णस्य तथाविधानि गोवर्द्धनोद्धरणादिरूपाणि कृतानि क
र्माणि गायंत्यः ईयुर्ययुः कथंभूताः एवं प्रेमणा हृदिस्पृशोतीति हृदिस्पृशस्ताः यद्वा कथंभूतस्य प्रेष्ठत्वे
न तासां हृदिस्पृक् कृतस्य इति भावार्थे दशमे पंचविंशः २५ षड्विंशे विस्मितानां गोपानां कृष्णस्याद्भुतकर्म्म

२९ तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरंभणादिभिः गोप्यश्च सस्नेहमपूजयन्मुदा द
ध्यक्षताद्भिर्युयुजुः सदाशिषः २९ यशोदा रोहिणी नंदो रामश्च बलिनां वरः कृष्णमालिंग्य युयु
जुराशिषः स्नेहकातराः ३० दिवि देवगणाः साध्याः सिद्धगंधर्वचारणाः तुष्टुवुर्मुमुचुस्तुष्टाः पु
ष्पवर्षाणि पार्थिव ३१ शंखदुंदुभयो नेदुर्दिवि देवप्रणोदिताः जगुर्गंधर्वपतयः तुंबुरुप्रमुखा
नृप ३२ ततोनुरक्तैः पशुपैः परिश्रितो राजन्स्वगोष्ठं सबलोव्रजद्धरिः तथाविधान्यस्य कृ
तानि गोपिका गायंत्य ईयुर्मुदिता हृदिस्पृशः ३३ इति श्रीभागवते दशमे पंचविंशोध्यायः २५
श्रीशुक उवाच एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते अतद्वीर्यविदः प्रोचुः समभ्येत्य सुवि
स्मिताः १ गो

भिः नंदो गर्गोक्तिमाश्राव्य तदैश्वर्यमवर्णयत् समभ्येत्य नंदमभिगम्य
यहतद्बालकस्येति १ यद्यस्मात् कृष्णस्याद्भुतानि कर्माणि तस्मात् ग्राम्येषु गोपे
षु कथंमन्माहेति आत्मजन्मशुपितं आत्मानं नह २ ॥

कथमस्मत्सु जन्मात्मजत्वमस्य भवति २
गोपा ऊचुः बालकस्यैतानि कर्माणि पाऊचुः

श्री॰
भा॰ द॰
स्टी॰
५८

अद्भुतानिकर्माण्यूचुः द्वादशभिः यःसप्तहायनइति सप्तहायनःसप्तवार्षिकःकथंबिभ्रत
स्थितइतिपुष्करंपद्मंगजराडिवमहागजइव ३ महौजसोमहाबलायाः तनोर्वयःआयुर्यथावह्निर्वा
कालेनयथापीयतेतद्वत्कथमित्यनुवर्तते ४ अनसःअधःशयानस्यमासस्यमासाःत्रयःपरिच्छे

यःसप्तहायनोबालःकरेणैकेनलीलया कथंबिभ्रद्गिरिवरंपुष्करंगजराडिव ३ तोके
नामीलिताक्षेणपूतनायामहौजसः पीतःस्तनःसहप्राणैःकालेनेववयस्तनोः ४ हि
न्वतोधःशयानस्यमास्यस्यचरणावुदक् अनोऽपतद्विपर्यस्तंरुदतःप्रपदाहतं ५ एकहा
यनआसीनोह्रियमाणोविहायसा दैत्येनयस्तृणावर्तमहन्कण्ठग्रहातुरं ६ क्वचिद्धैयंगव
स्तेयेमात्राबद्धउदूखले गच्छन्नर्जुनयोर्मध्येबाहुभ्यांतावपातयत् ७ वनेसंचारयन्व
त्सान्सरामोबालकैर्वृतः हन्तुकामंबकंदोर्भ्यांमुखतोरिमपाटयत् ८ वत्सेषुवत्सरू
पेणप्रविशन्तंजिघांसया हत्वान्यपातयत्तेनकपित्थानिचलीलया ९ हत्वारासभदै
तेयंतद्बन्धूंश्चबलान्वितः चक्रेतालवनंक्षेमंपरिपक्वफलान्वितं १० ॥ रामाय

दकाःयस्यउदक्ऊर्ध्वेचरणौहिन्वतःचालयतःप्रपदेनपादाग्रेणाहतंविपर्यस्तंविपरीतंअनःश
कटमपतत् ५ योदैत्येनह्रियमाणःसन्तंतृणावर्तंदैत्यंकथमहन्निरस्यर्थः ६ हैयंगवस्तेयेनवनी
तचौर्येबाहुभ्यांगच्छन्नगान्निरर्थः ७ मुखतोहन्तुकामोयस्तंबकवेषमरिंबाहुभ्यांमुखतःकथम

५८

११ आशीविषतमातिक्रूरविषज्वालावहीं द्रुचतं १२ औत्पत्तिकः स्वाभाविकः कथमितिकं सर्वेषा
मात्मास्यादितिशंका १३ उक्तमप्यनिविस्मयेनाभिनयेनवदेति क्वसप्तहायनइति १४ प्राकृष्ण
प्रलंबंघातयित्वोग्रंबलेनबलशालिना अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः ११
आशीविषतमाहींद्रंदमित्वाविमदंह्रदात् प्रसह्योद्वास्ययमुनांचक्रेसौनिर्विषोदकां १२
दुस्त्यजश्चानुरागोस्मिन्सर्वेषांनोव्रजौकसां नंदतेतनयेस्मासुतस्याप्यौत्पत्तिकःकथं
क्वसप्तहायनोबालः क्वमहाद्रिविधारणं ततोनोजायतेशंकाव्रजनाथतवात्मजे १४
नंदउवाच श्रूयतांमेवचोगोपाव्येतुशंकाचवोर्भके एनंकुमारमुद्दिश्यगर्गोमेयदुवाच
ह १५ वर्णास्त्रयःकिलास्यासन्गृह्णतोनुयुगंतनूः शुक्लोरक्तस्तथापीतइदानींकृ
ष्णतांगतः १६ प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः वासुदेवइतिश्रीमानभिज्ञाःसं
प्रचक्षते १७ बहूनिसंतिनामानिरूपाणिचसुतस्यते गुणकर्मानुरूपाणितान्यहंवेदनो
जनाः १८ एषवःश्रेयआधास्यद्गोपगोकुलनंदनः अनेनसर्वदुर्गाणियूयमंजस्तरिष्य
थ १९ पुरानेनव्रजपतेसाधवोदस्युपीडिताः अराजकेरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः
यएतस्मिन्महाभागाःप्रीतिंकुर्वंतिमानवाः नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः
त्तमेवगर्गाचार्यवाक्यंतच्चरितपरिशीलनेननिवृत्तासंभावनस्यनंदस्यकृष्णतत्त्वाववोधकंजातंस

दर्शनेनैववाक्येनगोपानुपदिशति श्रूयतामिति १५ १६ १७ १८ १९ २०-२१॥

श्री॰
भा॰द॰
पृ॰टी॰
९९

इत्यद्धा मां त्वां प्रतिसमादिश्य गर्गो स्वगृहं गते सति । तदानीं तथा मन्यमानो पीदानीं श्रीकृष्णं श्री
नारायणस्यांशं मन्ये अशद्देन राक्लिष्टकारिणमिति २३ २४ गोवर्द्धनोद्धरणमुपरिकरमनुस्मृत्य प्रकटि
तैश्वर्यस्य श्रीकृष्णस्य प्रीतिं प्रार्थयन्ते देवइति यत्तद्विप्लवेन यारुह्टतयादेवे देवे वर्षति सति वज्राश्मव।
र्षानिलैरत्यन्तं जलशर्करानीववायुभिः सीदत्पालपशुस्त्रि सीदंतः पालाः पशवः स्त्रियश्च यस्मिंस्तत्

इत्यद्धा मां समादिश्य गर्गे च स्वगृहं गते मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणं २३ इति नं
दवचः श्रुत्वा गर्गगीतं व्रजौकसः दृष्टश्रुतानुभावस्य कृष्णस्यामिततेजसः २४ मुदिता नंदमा
नर्चुः कृष्णं च गतविस्मयाः देवे वर्षति यज्ञविप्लवरुषा वज्राश्मवर्षानिलैः सीदत्पालपशु
स्त्रियात्मशरणं दृष्ट्वानुकंप्युत्स्मयन् उत्पाट्यैककरेण शैलमबलो लीलोच्छिलीन्ध्रं य।
थाबिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्न इंद्रो गवां २५ इति श्रीभागवते दशमस्कंधे ष
((ड्विंशोध्यायः २६

तथात्मा स्वयमेव शरणं यस्य तद्गोष्ठं दृष्ट्वानुकंपी कृपावान् उत्स्मय
न् हसन्प्रौढिमाविष्कुर्वन् शैलमुत्पाट्य अबलो बालो लीलार्थमुच्छिलीन्ध्रं यथा एकेन करे।
ण बिभ्रत् तद्गोष्ठं अपात् पालितवान् एवं महेंद्रमदभित् गवामिंद्रः अस्मत्पराभवेऽपि अस्मासु च
प्रसीदति सएवंभूतः श्रीकृष्णोनः प्रीयात् प्रीयतामिति षट्विंशे दशमे प्रोक्तः षट्त्रिंशो दशमो हरेः
वनक्रीडा पंचविंशमांचत्वारिंशतिनः पृथक् २५ इति भावार्थदीपिकायां दशमे षड्विंशः २६

९९